**PURANETIHASA**

**Soft-core 5th Course**

**ACHARYA 1st YEAR**

**Course/Paper.5**

# अष्टादशपुराणपरिचयः

## *Aṣṭādaśapurāṇaparicaya:*

**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# आमुखम्

**क) पुराणशब्दस्य व्युत्पत्तिः अर्थश्च** – 'यथा नाम तथा गुण' इति भारतीयपरम्परानुसारं वेदादिशास्त्राणामिव पुराणसाहित्यस्य नामापि सार्थकम् अस्ति । अतीतकालबोधकात् 'पुरा'शब्दात् अण् प्राणने इति धातोः अच् प्रत्यये कृते पुराणशब्दो निष्पद्यते । अतः एतद्व्युत्पत्त्यनुसारं पुराणमस्ति प्राचीनपरम्परादिसंस्मारकम् उज्जीवकं वा महच्छास्त्रम् ।

पुराभवं पुराणम् इत्यर्थे 'पुरा' अव्ययात् 'सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् चे'ति पाणिनीयसूत्रानुसारं 'ट्यु' प्रत्ययस्य 'ट'कारस्य लोपे 'युवोरनाकौ' इति सूत्रेण योः अनादेशे नस्य णत्वे निपातनेन तुट् अभावे पुराणशब्दः निष्पद्यते । एतद्व्याख्यानानुसारं पुराणं पुरातनशास्त्रमिति ज्ञायते ।

पुरापूर्वकात् अण्शब्दे इति भ्वादिगणीयधातोः अच् प्रत्यये कृते पुराणशब्दस्य निष्पत्तिः भवति । एतद्व्युत्पत्त्यनुसारं यत् अतीतान् परम्परादिविषयान् कथयति तत् पुराणमिति ।

पुरा अव्ययात् णीन् प्रापणे इति धातोः ड प्रत्यये टिलोपे न स्य णत्वेच पुराणशब्दः निष्पद्यते । अस्मात् व्याख्यानात् ज्ञायते यत् पुराणमेव पुरातनतत्त्वानां वर्णनमाध्यमेन आधुनिकजनान् अपि प्राचीनपरम्परापर्यन्तं नयतीति ।

निरुक्तकारः यास्कः 'पुरा नवं भवती'ति (३/९/३४) पुराणशब्दस्य निर्वचनं कृत्वा पुराणमेव सुप्राचीनसत्यघटनाप्रतिपादकं शास्त्रमिति प्रतिपादयति ।

महान् वैष्णवदार्शनिको जीवगोस्वामी तत्त्वसन्दर्भग्रन्थे पुराणशब्दस्य 'पूरयतीति पुराणम्' इति निर्वचनं कृत्वा वेदार्थपूरको वेदविशेष एव पुराणमिति कथयति ।

वायुपुराणं पूर्वकालात् अधुनाऽपि जीवितं शास्त्रमेव पुराणम् इति निर्वचनं करोति । तद् यथा – यस्मात् पुरा ह्यनतीदं पुराणं तेन कथ्यते ।

निरुक्तिमस्य यो वेद सर्वपापैः प्रमुच्यते ।। वा. पु. १/२०/३

पद्मपुराणन्तु प्राचीनपरम्पराप्रतिपादकं शास्त्रमेव पुराणमिति कथयति –

पुरा परम्परां वक्ति पुराणं तेन तत्स्मृतम् । प. पु. – १/२/५४

पुरा संघटितघटनाप्रतिपादकं शास्त्रमेव पुराणमिति ब्रह्माण्डपुराणमतम् –

यस्मात्पुरा ह्यभूच्चैतत् पुराणं तेन तस्मृतम् । ब्र. पु. १/१/१७३

मत्स्यपुराणं पुरातनकल्पस्य इतिवृत्तप्रकाशकग्रन्थविशेष एव पुराणमिति प्रकाशयति –

पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः । म. पु. – ५३/७२

एवं प्राचीनतत्त्वानां प्रकाशकं वेदार्थपूरकं च सर्गादिपञ्चलक्षणलक्षितं व्यासकृतं शास्त्रमेव पुराणमिति कथ्यते ।

**ख) पुराणलक्षणम्** – प्रत्येकं वस्तुनः स्वरूपज्ञानार्थं तल्लक्षणस्य आवश्यकता वर्त्तते इति हेतोः पुराणशास्त्रस्याऽपि स्वरूपं तल्लक्षणेन ज्ञायते । सृष्टिः, प्रलयः, प्रसिद्धराजवंशपरम्परा, मन्वन्तरम्, देवर्षिराजवंशेषु जातानां विशिष्टव्यक्तीनां चरितवर्णनश्चेति पंचविषयाः पुराणलक्षणत्वेन स्वीक्रियन्ते । अर्थात् एते पंचविषयाः यत्र मुख्यतया विवेचिताः सन्ति तदेव पुराणमिति कथ्यते –

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ।।

अधुना सर्गादिपञ्चविषयाणां सामान्यस्वरूपं विचार्यते । तत्रादौ सर्गो नाम सृष्टिः । ईश्वरप्रेरणया विक्षुब्धायाः सत्त्वादिगुणत्रयसाम्यावस्थारूपायाः प्रकृतेः सकाशात् महत्तत्त्वस्य, ततश्च अहंकारस्य, ततः एकादशेन्द्रियाणां पञ्चतन्मात्राणाञ्च, तन्मात्रेभ्यः पञ्चमहाभूतानाञ्चोत्पत्तिः सर्ग इति कथ्यते । किञ्चानन्तरं ब्रह्मणा यत् चराचरं जगत् सृज्यते तदपि सर्गपदवाच्यं भवति ।

प्रतिसर्गो नाम सृष्टस्य जगतः प्रलयः । अयं च नैमित्तिकः प्राकृतिकः नित्यः आत्यन्तिकश्चेति भेदेन चतुर्विधः । ब्रह्मणः दिवसावसाने या रात्रिः भवति तत्र त्रयो लोकाः प्रलयाय कल्पन्ते । अतः ब्रह्मरात्रिं निमित्तीकृत्य प्रलयोऽयं जायते इति हेतोः नैमित्तिकलय इति कथ्यते । ब्रह्मणः द्विपरार्धात्मके आयुष्काले सम्पूर्णे सति समग्रं ब्रह्माण्डं प्रलयाय कल्पते । अत्र पृथिवीतत्त्वात् आरभ्य महत्तत्त्वपर्यन्तं सर्वाणि तत्त्वानि विपरीतक्रमेण प्रकृतौ लीयन्ते इति हेतोः अयं प्राकृतलय इति निगद्यते । आत्यन्तिकलयश्च जीवस्य जीवत्वविनाशकः मोक्षरूपः अस्ति । अस्य कृते सामान्यतः कोऽपि कालनिर्देशः नास्ति । यस्य जीवस्य साधनबलेन भगवत्कृपया च आत्मस्वरूपज्ञानं भवति तस्य

अज्ञाननाशपूर्वकं संसारनाशो भवति । ततश्च ब्रह्मानुभवरूपः जीवत्वस्य संपूर्णतया लयः भवतीति हेतोः आत्यन्तिकलयः इति कथ्यते । नित्यं च जगत्यस्मिन् प्राणिनां यः भौतिकक्षयः, अवस्थापरिवर्त्तनं वा भवति तदेव नित्यप्रलय इति कथ्यते ।

अनन्तरं ब्रह्मप्रसूतानां राज्ञां वंशपरम्परा एव वंश इति कथ्यते । अत्र प्रसिद्धयोः सूर्यचन्द्रवंशयोः वंशपरम्परा प्रामुख्येन वर्ण्यते ।

मनोः अन्तरं शासनावधिः एव मन्वन्तरं कथ्यते । ब्रह्मणः एकसहस्रचतुर्युगात्मके दिवसभागे चतुर्दशमनवः समानकालविभागपूर्वकं विश्वं पालयन्तीति हेतोः प्रत्येकं मनोः कालः साधिकैकसप्तति७१ चतुर्युगात्मकः एव । एकस्मिन् मन्वन्तरे षट् तत्त्वानि वर्तन्ते यथा – मनुः, देवाः, मनुपुत्राः, सुरेश्वरः, सप्तर्षयः, हरेः अंशावतारश्चेति –

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।
ऋषयोऽशावतारश्च हरेः षड्विधमुच्यते ।। श्री.भा. १२/७/१५

चतुर्दशमन्वन्तरेषु पृथक् पृथक् स्थितानां मन्वादीनां नामानि पुराणेषु यद्यपि दृश्यन्ते तथापि मुख्यत्वात् मनूनामेव नामानि बहुत्र कीर्त्तितानि । तानि यथा – १)स्वायम्भुवः, २)स्वाराचिषः, ३)उत्तमः, ४)तामसः, ५)रैवतः, ६)चाक्षुषः, ७)वैवस्वतः, ८)सावर्णिः, ९)दक्षसावर्णिः, १०)ब्रह्मसावर्णिः, ११)धर्मसावर्णिः, १२)रुद्रसावर्णिः, १३)देवसावर्णिः (रुचिः), १४)भौमः (भौत्यः, इन्द्रसावर्णिः वा) इति ।

राजवंश्यानां राज्ञां चरितमेव वंशानुचरितमिति कथ्यते । सूर्यवंशे सगर – भगीरथ – दशरथ – श्रीरामादीनां, चन्द्रवंशे पुरुरव – श्रीकृष्णादीनां च चरितं यत् प्रामुख्येन वर्ण्यते तदेव वंशानुचरितमिति निगद्यते ।

एवं सर्गादिपञ्चलक्षणलक्षितं शास्त्रमेव पुराणनाम्ना परिचीयते ।

**ग) पुराणकृद्व्यासपरिचयः** – व्यसति विस्तारयति वेदान् इति व्यासः । कालगत्या परस्परं मिलित्वा अस्पष्टतया एकरूपेण स्थितानां वेदानां पुनः विभाजनेन, तदर्थप्रकाशकपुराण–रचनया च वेदविस्ताररूपं कर्म कुर्वतः विष्णोः अवतारविशेषस्य उपाधिरेव व्यासः इति । पूर्वोक्तकर्म कर्त्तुं स्वयं भगवान् विष्णुः प्रतिद्वापरं व्यासत्वेन अवतरेति –

द्वापरे द्वापरे विष्णुर्व्यासरूपेण सर्वदा
वेदमेकं तु बहुधा कुरुते हितकाम्यया ।
अल्पायुषोऽल्पबुद्धींश्च विप्रान् ज्ञात्वा कलावथ
पुराणसंहितां पुण्यां कुरुतेऽसौ युगे युगे ।। दे.भा. १/३/१९-२०

'द्वापरे द्वापरे' इति कथनात् सृष्टेः आरम्भकालात् अद्यावधि यावन्ति चतुर्युगानि अतीतानि तावत्सु द्वापरेषु एव तावन्तः व्यासावताराः जाताः । किन्तु एतावत्पर्यन्तम् अतीनानां सर्वेषां व्यासानां नामनिर्देशः असम्भवः इति हेतोः शास्त्रेषु केवलं वर्तमानस्य चतुर्मुखब्रह्मणः द्वितीयपरार्द्धे प्रथमदिवसीय - सप्तमवैवस्वतमन्वन्तरेऽतीतेषु अष्टाविंशदिद्वापरेषु आविर्भूतानाम् अष्टाविंशतिव्यासानां नामानि कीर्तितानि - १)ब्रह्मा, २)प्रजायतिः, ३)शुक्राचार्यः, ४)बृहस्पतिः, ५)सूर्यः, ६)यमः, ७)इन्द्रः, ८)वशिष्ठः, ९)सारस्वतः, १०)त्रिधामा, ११)त्रिशिखः, १२)भरद्वाजः, १३)अन्तरिक्षः, १४)वर्णी धर्मी वा, १५)त्रय्यारुणः, १६)धनञ्जयः, १७)ऋतुञ्जयो मेधातिथिः वा, १८)जयो व्रती वा, १९)भरद्वाजः, २०)गौतमः, २१)हर्यात्मा, २२)वाजश्रवाः, २३)सोमशुष्मायणतृणविन्दुः, २४)भार्गवक्षः वाल्मीकिः वा, २५)शक्तिः, २६)पराशरः, २७)जातुकर्णः २८)कृष्णद्वैपायनश्चेति ।

अधुना वर्त्तमानस्य कृष्णद्वैपायनवेदव्यासस्य संक्षिप्तपरिचयः प्रस्तूयते । गतद्वापरे भगवान् विष्णुः व्यासरूपेण पराशरात् सत्यवत्यां यमुनान्तर्गते द्वीपे आविर्भूतः आसीत् । स एव कृष्णवर्णत्वात् कृष्णः वेदविस्तारकत्वात् वेदव्यासश्चेति कथितः । तद्यथा -

द्वीपे जातो यतो बालस्तेन द्वैपायनोऽभवत् ।
वेदशास्त्रविभजनाद् वेदव्यासः प्रकीर्त्तितः ।। दे. भा. २/३/४१

अस्य कृष्णद्वैपायनस्य पिता पराशरः वशिष्ठपुत्रस्य शक्तेः पुत्रः आसीत् । कृष्णद्वैपायनस्य पुत्रः आसीत् ब्रह्मज्ञानी शुकदेवः । एवं स कृष्णद्वैपायनः वशिष्ठस्य प्रपौत्रः, शक्तेः पौत्रः, पराशरस्य पुत्रः, शुकदेवस्य च पिता आसीत् । किञ्चायं धृतराष्ट्रस्य, पाण्डोः, विदुरस्य च जनकत्वात् कौरव-पाण्डवैः सह साक्षात् सम्बन्धितः आसीत् । अस्य निवासभूमिः हिमालये बदरिकाश्रमः एव आसीत् । किन्तु श्रीमद्भागवतमतेन सरस्वत्याः पश्चिमतटे बदरीवृक्षसमूहविमण्डितः शम्याप्रासाश्रमः एव तस्य वसतिः आसीत् ।

अनेन प्रकारेण भारतीयसंस्कृतौ व्यासः वेदविभागकर्त्ता, पुराणप्रणेता, महाभारतरचयिता, ब्रह्मसूत्रप्रणेता चैत्यादिरूपेण परिचितोऽस्ति ।

**घ) व्यासप्रणीतपुराणानि** – सृष्टिकृद् ब्रह्मा सर्वशास्त्रप्रकाशनात् पूर्वं प्रथमतः पुराणवाङ्मयं स्मृत्वाऽनन्तरं चतुर्भ्यो मुखेभ्यो वेदान् प्रकाशयामास । तेन यत् पुराणवाङ्मयं स्मृतं तदेव शतकोटिप्रविस्तरम् अर्थात् शतकोटिश्लोकविशिष्टं, त्रिवर्गसाधनम्, एकम् अर्थात् ब्राह्मपाद्मादिभेदरहितं चासीत् । अतिविशालकायस्य पुराणवाङ्मयस्यास्य यथार्थग्रहणं कालप्रभावितैः जनैः न संभवतीति दृष्ट्वा भगवान् विष्णुः प्रतिद्वापरं व्यासरूपं धृत्वा तच्चतुर्लक्षश्लोकेषु संक्षिप्य अष्टादशधा विभज्य च भूर्लोके प्रकाशयामास ।

एवं वेदव्यासः शतकोटिप्रविस्तरं पुराणसाहित्य चतुर्लक्षश्लोकेषु संक्षिप्य अष्टादशधा विभक्तवान् । अष्टादशधा विभागानन्तरं यानि पुराणानि प्रकाशितानि तानि महापुराणानीति लोके ख्यातान्यभवन् । तानि अष्टादशमहापुराणानि विष्णुपुराणे कथितानि यथा – १)ब्रह्मपुराणम्, २)पद्मपुराणम्, ३)विष्णुपराणम्, ४)शिवपुराणम्, ५)भागवत्पुराणम्, ६)नारदीयपुराणम्, ७)मार्कण्डेयपुराणम्, ८)अग्निपुराणम्, ९)भविष्यपुराणम्, १०)ब्रह्मवैवर्त्तपुराणम्, ११)लिङ्गपुराणम्, १२)वराहपुराणम्, १३)स्कन्दपुराणम्, १४)वामनपुराणम्, १५)कूर्मपुराणम्, १६)मत्स्यपुराणम्, १७)गरुडपुराणम्, १८)ब्रह्माण्डपुराणञ्चेति । श्रीमद्भागवतेऽपि एतान्येव पुराणनामानि कीर्त्तितानि । किन्तु नारदीयपुराणे देवीभागवते च शिवपुराणस्थाने वायुपुराणमेव महापुराणेषु गण्यते । तत्र देवीभागवते पुराणानाम् आद्याक्षरसाम्यं गृहीत्वा तन्मानानि प्रकाशितानि –

म–द्वयं भ–द्वयं चैव ब्र–त्रयं व–चतुष्टयम्<br>
अ–ना–प–लिं–ग–कूस्कानि पुराणानि प्रचक्षते ।। १/२/३

अतो वयं व्यासप्रकाशितानां पूर्वोक्तमहापुराणानां संक्षिप्तपरिचयविषये विवेचयामः । अत्र विकल्पत्वेन महापुराणरूपेण स्वीकृतयोः वायुपुराण – देवीभागवतयोरपि परिचयः यथास्थानम् उपस्थापयिष्यते इति ।

❖❖❖

## प्रथमोंऽशः

## (अष्टादशपुराणेषु ब्राह्म-पाद्म-वैष्णवानां परिचयः)

**प्रस्तावना** - श्रीमत्कृष्णद्वैपायनवेदव्यासप्रणीतेषु अष्टादशमहापुराणेषु ब्रह्मपुराणं प्रथममिति विष्णुपुराणादिभिः निर्विवादं स्वीक्रियते । तथा च द्वितीयतृतीयपुराणरूपेण यथाक्रमं पद्मपुराणस्य विष्णुपुराणस्य च गणनं भवति । एतेषां त्रयाणां पुराणानां परिचयार्थं प्रथमांशस्यास्य कल्पनाऽस्माभिः कृता । परिचयप्रसंङ्गे पुराणगणनायाम् एतेषां स्थानं, श्लोकसंख्या, पुराणान्तरदृष्ट्या वर्ण्यविषयाः, अन्तर्विभाजनं, विषयोपन्यासः, माहात्म्यं, रचनाकालसंभावनादिविषयाः संक्षेपेण विवेचयिष्यन्ते ।

**उद्देश्यम्** - परिचयप्रसङ्गे वयम् एतेषां ब्राह्म-पाद्म-वैष्णवपुराणानां यथाक्रमं निम्नोक्तबिन्दून् आधारीकृत्य परिचयं प्राप्स्यामः । ते यथा -

• पुराणान्तरदृष्ट्या पुराणनामेतेषां पुराणेषु स्थानम् • पुराणान्तरदृष्ट्या मुख्यवर्ण्यविषयाः श्लोकसंख्या च • प्रस्तुतपुराणानाम् अन्तर्विभाजनम् • संक्षेपेण अध्यायविवरणं माहात्म्यञ्च • पुराणानां समीक्षण प्रसङ्गे रचनाकालस्थानसम्भावना चेति ।

**१) ब्रह्मपुराणम्** - पुराणमिदम् अष्टादशसु पुराणेषु प्रथमपुराणम् अस्तीति विष्णुपुराणस्य मतम् -

आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ।। वि.पु.३/६/२०

पुराणमिदं पुराणविग्रहस्य भगवतो विष्णोः मस्तकमस्ति । ब्रह्मपुराणमिदं दशसहस्रश्लोकात्मकमिति नारदीयपुराणम्, विष्णुपुराणम्, शिवपुराणम्, स्कन्दपुराणम्, ब्रह्मवैवर्त्तम्, श्रीमद्भागवतम्, मार्कण्डेयपुराणञ्च कथयति । परन्तु मत्स्यपुराणानुसारं पुराणेऽस्मिन् ब्रह्मणा प्रोक्ताः त्रयोदशसहस्रश्लोकाः सन्ति । पद्मपुराणम्, लिङ्गपुराणम्, कूर्मपुराणञ्चेति पुराणानि ब्रह्मपुराणं त्रयोदशसहस्रश्लोकविशिष्टं कथयन्ति ।

अस्मिन् ब्रह्मपुराणे भागद्वयम् अस्ति - पूर्वभागः उत्तरभागश्च । पूर्वभागे ५७अध्यायाः

उत्तरभागेच १८८ अध्यायाः, एवं मिलित्वा २४५ अध्यायाः सन्ति । ब्रह्मणा कथितत्वात् पुराणस्यास्य नाम ब्रह्मपुराणमिति, न तु ब्रह्ममाहात्म्यसूचकत्वात् । पुराणमिदम् आत्मानं वैष्णवपुराणत्वेन कीर्तयति; यतो हि पुराणस्यास्य श्रद्धापूर्वकश्रवणेन पाठेन च विष्णुलोक-प्राप्तिर्भवतीति चर्चाऽत्र कृताऽस्ति ।

**वर्ण्यविषयाः** - पुराणेऽस्मिन् भगवतः विष्णोः अवताराणां वैशिष्ट्यं प्रामुख्येन वर्ण्यते । उत्कलेषु च श्रीपुरुषोत्तमक्षेत्रे पूजितस्य भगवतः श्रीजगन्नाथस्य माहात्म्यं विशेषरूपेण संप्रकाशितम् । अनन्तरं विविधतीर्थानां वर्णनं गौतमीगङ्गा (गोदावरी) माहात्म्य प्रसङ्गे ७५-१७५ अध्यायेषु कृतं वर्त्तते । इतः पूर्वं २८अध्याये उत्कलप्रान्तस्थकोणादित्यक्षेत्रस्य महती प्रंशसा कृतास्ति । तत्र प्रतिष्ठितस्य भगवतः सूर्यस्य स्वरूपं पूजाविषयश्च २५-२९अध्यायेषु प्रतिपादितोऽस्ति । ६६अध्याये भगवतः जगन्नाथस्य गुण्डिचा(गुण्डिवा)यात्रायाः महत्त्वं प्रदर्शितमस्ति -

गुण्डिवामण्डपं यान्तं ये पश्यन्ति रथेस्थितम् ।
कृष्णं बलं सुभद्रां च ते यान्ति भवनं हरेः ।। ब्र.पु. ६६/१

अत्र च ब्राह्मे ३०-४०अध्यायपर्यन्तं दशाध्यायेषु पार्वतीस्वयंवरस्य शिवपार्वतीविवाहस्य च अतीवमनोरमवर्णनं समुपलभ्यते । अपि च २३४-२४३अध्यायेषु सांख्ययोगयोः स्पष्टवर्णनं समुपलभ्यते । राज्ञा करालजनकेन पृष्टो महर्षिवशिष्ठः सेश्वरसांख्यस्य प्रतिपादनं चकार । तत्र ज्ञानेन सह भक्तेः वैशिष्ट्यं प्रदर्शितम् ।

अस्मिन् पुराणे सृष्टिवर्णनेन सह राजवंशवर्णनं, पार्वत्युपाख्यानं, मार्कण्डेयचरितं, गङ्गागौतमीप्रभृतीनां नदीनां वैशिष्ट्यं, चक्रतीर्थादितीर्थमाहात्यं, श्रीकृष्णचरितञ्चेत्यादिविषयाः सम्यग्वर्णिताः ।

ब्रह्मपुराणं भारतवर्षस्य, तत्र च पुण्यक्षेत्रदण्डकारण्यस्य महद्वैशिष्ट्यं प्रदिपादयति । दण्डकारण्ये प्रवाहितायाः गौतमीगङ्गायाः गोदावर्य्याः नदीषु श्रेष्ठत्वं प्रदिपाद्य तज्जलसेवनेन, तत्रकृतयज्ञेन दानेन च भुक्तिः मुक्तिश्च प्राप्येते इति प्रकाशयति (८८/१८-१९)।

अत्र च पुराणे सर्वेषु पात्रेषु पुराणज्ञस्य श्रेष्ठ-सत्पात्रत्वं प्रतिपाद्यते । किञ्च गो-गङ्गा-पुराण-ब्राह्मण-पिप्पलवृक्षेषु भगवद्बुद्धिं कृत्वा तत्र श्रद्धाप्रदर्शनस्योपदेशः प्रदीयते । पुराणञ्चैतत् परस्त्रीनिरीक्षणादीनां निन्दनमपि करोति (२२५/४९-५१)।

**स्थानकालादिविवेचनम्** - अस्य पुराणस्य रचनायाः स्थानकालयोः सम्भावना तद्वर्ण्यविषयेभ्यः कर्तुं शक्यते । पुराणस्य आदिभागे मुख्यतः उत्कलप्रदेशस्य, तत्रस्थस्य पुरुषोत्तमक्षेत्रस्य, गुण्डिचायात्रायाः, कोणार्कस्य च वैशिष्ट्यप्रतिपादनपूर्वकं विस्तृतवर्णनं कृतमिति हेतोः पुराणस्याऽस्य आदिभागः उत्कलेषु प्रणीतः स्यादिति समालोचकानां मतम् । तत्परवर्त्ती भागश्च गोदावरीनदीतीरस्थ-दण्डकारण्ये प्रणीत इति मन्यते; यतो हि दण्डकारण्यं सर्वश्रेष्ठक्षेत्रं, गोदावरीनदी च सर्वश्रेष्ठतीर्थमिति स्वीक्रियेते । एतस्मात् पुराणप्रणेतुः क्षेत्रेऽस्मिन् महान् आग्रहः परिलक्ष्यते इति हेतोः भागस्यास्य प्रणयनं गोदावरीतीरभूमौ दण्डकारण्ये वा स्यादिति ।

पुराणस्यास्य रचनाकालविषये मतद्वयं वर्त्तते । केषांचिन्मते पुराणस्यास्य प्रणयनं त्रयोदशशताब्द्यां, केषांचिच्च मते ततः पूर्वम् अभूत् इति मतवैषम्यं विद्यते । प्रथममतस्य समर्थकाः डॉ. विलसन् प्रभृतयः पाश्चात्यसमालोचकाः तदनुयायिनो भारतीयसमालोचकाश्च कथयन्ति यत् यद्यपि जीमूतवाहन-वल्लालसेन-कल्पतरुकारैः उद्धृताः ब्रह्मपुराणीयश्लोकाः प्रचलितब्रह्मपुराणे नैव समुपलभ्यन्ते, तथापि पुरुषार्थचिन्तामणिकारैः वाचस्पतिमिश्रैः स्वकीये निबन्धग्रन्थे समुद्धृताः ब्रह्मपुराणीयश्लोकाः प्रचलितब्रह्मपुराणे समुपलभ्यन्ते इति हेतोः वाचस्पतिमिश्राणां स्थितिकालात् पूर्वमेव ब्रह्मपुराणस्य रचनाकालः स्यात् । वाचस्पतिमिश्राणां स्थितिकालः पञ्चदशशताब्दी वर्त्तते । अतः ततः पूर्वं प्रायः त्रयोदशशताब्दी एव ब्रह्मपुराणस्य रचनाकालः स्यादिति तेषां मतम् । परन्तु अन्येषां केषांचित् मतं वर्त्तते यत् त्रयोदशशताब्द्याः पूर्वमपि प्रणीते हलायुधस्य ब्राह्मणसर्वस्वे, हेमाद्रिपरिशिष्टखण्डे, वल्लालसेनस्य दानसागरे च ब्रह्मपुराणस्य बहुश्लोकाः समुपलभ्यन्ते इति हेतोः त्रयोदशशताब्द्याः पूर्वमेव ब्रह्मपुराणस्य रचना अभूदिति । एवं कालविषये यत् मतद्वयं वर्त्तते तदेव प्रचलितब्रह्मपुराणाऽधारेण प्रवृत्तम् । प्रचलितब्रह्मपुराणे जीमूतवाहनादिभिः स्वस्वनिबन्धग्रन्थेषु ब्रह्मपुराणीयवचनरूपेण समुद्धृताः श्लोकाः न प्राप्यन्ते । पुनश्च पुराणस्यास्य बहवः अध्यायाः विष्णुपुराणस्य, नारदीयपुराणस्य, महाभारतीयशान्तिपर्वणः, वायुपुराणस्य, मार्कण्डेयपुराणस्य च बहुभिः अध्यायैः सह समानाः सन्ति । किञ्च पुराणस्यास्य १७५ अध्याये पुराणश्रवणफलस्य निर्देशात् हेतोः वास्तवतः अत्रैव पुराणस्य समाप्तौ जातायाम् अपि अनन्तरम् अवशिष्टाः १७६-२४५ पर्यन्तम् अध्यायाः प्रक्षिप्ता एवेति निश्चीयते । एवं प्रचलितपुराणं मूलपुराणं नास्ति, अपि तु प्रक्षेपबहुलं मन्यते इति ।

**बोधप्रश्नाः**

१. कस्य पुराणस्य मते ब्रह्मपुराणम् अष्टादशपुराणेषु प्रथमं मन्यते ?

२. मत्स्यपुराणादीनां मतेन पुराणेऽस्मिन् कियन्तः श्लोकाः सन्ति ?

३. पुराणस्यास्य पूर्वभागे कति अध्यायाः विद्यन्ते ?

४. पुराणस्यास्य आदिभागः कुत्ररचितः स्यात् ?

५. दण्डकारण्यं कुत्र वर्त्तते ?

६. डॉ. विलसनप्रभृतीनां मते पुराणस्यास्य रचनाकालः कः ?

७. पुराणेऽस्मिन् कति अध्यायाः सन्ति ?

**२. पद्मपुराणम् –**

सर्वाणि पुराणानि पद्मपुराणं द्वितीयपुराणं मन्यन्ते । इदमेव पुराणविग्रहस्य भगवतो विष्णोः हृदयम् अस्ति । मत्स्यपुराणमते शेषशय्यायां शयानस्य भगवतो नारायणस्य नाभिपद्मात् प्रकाशितसृष्टितत्त्वस्य प्रतिपादनात् पुराणस्यास्य नाम पद्मपुराणमिति । अत्र च ५५ सहस्राणि श्लोकाः सन्ति (म. पु. ५३/१४) ।

ब्रह्मवैवर्त्तपुराणमपि पद्मपुराणस्य श्लोकसंख्याम् इमां समर्थयति । पुराणस्यास्य पाठद्वयम् उत्तरभारतीयः दक्षिणभारतीयश्चेति वर्त्तते । तत्र उत्तरभारतीयपाठे पुराणमिदं पञ्चखण्डात्मकं,

दक्षिणभारतीयपाठे चेदं षट्खण्डात्मकं वर्त्तते । उत्तरभारतीयपञ्चखण्डानां नामानि यथा – सृष्टि, भूमि, स्वर्ग, पाताल, उत्तरञ्चेति । दक्षिणभारतीयपाठानुसारं षट्खण्डानां नामानि यथा – आदि, भूमि, ब्रह्म, पाताल, सृष्टि उत्तरञ्चेति । परन्तु उत्तरभारतीयपाठानुसारं पञ्चखण्डात्मकस्य पद्मपुराणस्य स्वर्गखण्डे पुराणमिदं सप्तखण्डात्मकं स्वीकृतम् । सप्तखण्डानि यथा – सृष्टि, भूमि, स्वर्ग, ब्रह्म, पाताल, उत्तर, क्रियायोगसारश्चेति । किञ्च पद्मपुराणीयसृष्टिखण्डे पुराणमिदं पञ्चपर्वात्मकं पौष्करं, तीर्थं, ग्रहणं, वंशानुचरितं, मोक्षपर्व चेति कथ्यते । परन्तु समालोचकाः पुराणमिदं पञ्चखण्डात्मकमिति बाहुल्येन स्वीकुर्वन्ति । अतः अधुना पद्मपुराणं पञ्चखण्डात्मकं स्वीकृत्य परिचयः प्रदीयते ।

**वर्ण्यविषयाः** – पुराणस्यास्य सृष्टिखण्डे ८२ अध्यायाः सन्ति । तत्र मुख्यतः लोकसृष्टेः कारणभूतस्य पद्मस्य तथा समग्रस्य ब्रह्माण्डस्योत्पत्तेः विवरणं प्रस्तुतं वर्त्तते । ततः द्वितीये भूमिखण्डे सप्तद्वीपानां सप्तसमुद्राणां नदनदीवनपर्वतादीनाञ्च वर्णनं विद्यते । तृतीये स्वर्गखण्डे वैकुण्ठलोकवर्णनं परलोकसाधनं प्रलयादिलक्षणं शिवलिङ्गार्चनविधिः वैष्णवतिलकविधानं नानाविधनियमनिरूपणं चेति विषयाः विवेचिताः । चतुर्थे पातालखण्डे श्रीरामस्य श्रीकृष्णस्य च लीलादिवर्णनं विस्तरेण वर्त्तते । पञ्चमे उत्तरखण्डे अपवर्गस्य मोक्षस्य साधनं विविधतीर्थमाहात्म्यम्, गृहस्थधर्मनिरूपणम् नवधासर्गवर्णनम् सात्त्विकादिपुराणपाठ–श्रवणफलप्रतिपादनञ्चेति विषयाः उपदिष्टाः सन्ति ।

प्रायः प्रत्येकं पुराणस्य उद्देश्यमस्ति मानवं भगवद्अभिमुखीकर्तुम् । अतः पुराणेषु बहवः उपायाः स्वीकृताः । तेषु प्रमुखोऽस्ति तीर्थाटनम्, तद्दर्शनम्, तत्रस्नानञ्चेति । तीर्थान्येव भगवतः अद्भुतलीलास्मारकत्वात् तत्र समागतस्य मानवस्य हृदये भगवन्तं स्मारयित्वा तं भगवदुन्मुखं कारयन्ति । अतः पुराणान्तरवत् पद्मपुराणमपि प्राधान्येन तीर्थानां वर्णनप्रसङ्गे तीर्थगमनविधिम्, तीर्थस्नानविधिम्, तत्स्वरूपं माहात्म्यञ्च विस्तरेण प्रकाशयति । तीर्थसेवनस्य मुख्यम् उद्देश्यं भगवत्स्मृतिरिति हेतोः पुराणमिदं कृष्णनामस्मरणमेव प्रमुखतीर्थमिति प्रतिपाद्य तन्नामोच्चारणेन च जनः सकलं जगत् पवित्रयति इति प्रकाशयति –

तीर्थानां च परं तीर्थं कृष्णनाम महर्षयः ।
तीर्थीकुर्वन्ति जगतीं गृहीतं कृष्णनाम यैः ।।

अतः कृष्णनामोच्चारणस्य जगत्पवित्रताकारकत्वात् स एव हरिः सर्वजगत्सृष्टिकृत् पालनकृत् संहारकृत् च वर्त्तते इति पद्मपुराणं स्पष्टं प्रतिपादयति । भगवतः जगत्सृष्टि-स्थिति-लयकर्त्तृत्वात् स एव सर्वरूपः सर्वव्यापकश्चास्ति । मनसा यच्चिन्त्यते, चक्षुरादिभिः इन्द्रियैः यद्‌गृह्यते, बुद्ध्या च यत् निश्चीयते तत्सर्वं स्वयं हरिरेव अर्थात् तत्सर्वं हरेः रूपमेवेति पाद्मसिद्धान्तः । भगवतः सर्वात्मकत्वात् सर्वरूपत्वात् वा तस्य सत्ता सर्वत्र वर्त्तते । विशेषतः पवित्रवस्तुषु तस्य सत्ता स्पष्टतया प्रतीयते इति हेतोः आमलकी-तुलसी-विल्व-पिप्पलादिवृक्षेषु भगवद्‌बुद्धिं कृत्वा तत्पूजनादि कर्तुं पुराणमिदं समुपदिशति । तेन पूजनादिना च जनः हरेः प्रसादात् भुक्तिं मुक्तिं च अनायासेन अधिगच्छतीति निश्चितफलश्रुतिः प्रकाशिता (प. पु. ७/२४/६७)।

पुराणस्यास्य प्रतिखण्डं भक्तेः निरूपणं विस्तरेण कृतं वर्त्तते । भक्तिं विना कथमपि भगवत्प्राप्तिः न स्यात् । यतो हि प्रथमतः श्रवणकीर्तनादिषु रुचिरूपा भक्तिः, ततः श्रवणकीर्तनादिसाधनरूपा भक्तिः, ततः भगवतः भक्तवात्सल्यादिस्वरूपज्ञानं, ततश्च भगवत्प्रीतिरूपा भक्तिः, तया च साक्षाद्‌भगवत्प्राप्तिरूपम् अमृतत्वं लभ्यते इति क्रमः पुराणेऽत्र प्रदर्शितोऽस्ति । तत्र प्रथमतः रुचिरूपायाः भक्तेः कारणरूपेणास्ति सत्सङ्गः । सत्सङ्गं विना शास्त्रश्रवणं श्रवणकीर्तनादिसाधनञ्च असम्भवमेव । अतः सत्सङ्गादेः क्रमः प्रदर्श्यते -

साधुसङ्गाद् भवेद्विप्र शास्त्राणां श्रवणं प्रभोः ।
हरिभक्तिर्भवेत् तस्मात् ततो ज्ञानं ततो गतिः ।।

पुराणे चात्र पुराणानां वर्गीकरणं सात्त्विक-राजस-तामसभेदेन कृतं वर्त्तते । सात्त्विकपुराणपाठेन मोक्षः, राजसपुराणपाठेन स्वर्गः, तामसानां पाठेन च तामसीवृत्तिः लभ्यते । तामस्या वृत्त्याच अधोगतिर्भवति (५/२३६/२१)।

गङ्गायाः आविर्भावादिचरितं माहात्म्यञ्च पद्मपुराणं विस्तरेण वर्णयति । बलिनिग्रहकाले भगवतो वामनस्य यः पादः ब्रह्मलोकपर्यन्तं प्रसारितः तं पादं प्रक्षाल्य ब्रह्मा पवित्रं तज्जलं स्वकमण्डलौ स्थापयामास । अनन्तरं स पवित्रं तज्जलं जगत्पवित्रतायै मेरोः शिखरे पातयामास । पतिता सा जलधारा चतुर्भिः प्रवाहैः विभक्ता सती चतसृषु दिक्षु प्रवाहिताऽभूत् । पूर्वस्यां दिशि सीता, दक्षिणस्याम् अलकनन्दा, पश्चिमायां चक्षुः, उत्तरस्यां च भद्रा चेति नामभिः विदिताऽभूत् । दक्षिणस्यां दिशि प्रवाहिता सा धारा लोकपावनी गङ्गेति नाम्ना विख्याता सती भगवता शङ्करेण स्वपवित्रतायै स्वजटाजूटे

धृताऽभूत् । ततश्च भगीरथः कपिलशापदग्धानां स्वपूर्वजानां मोक्षार्थं भगवन्तं शिवं तोषयित्वा तां गङ्गां भूतलम् आनयामास । तत्कालादेव सा भागीरथीति नाम्ना विख्याताऽभूत् । एवं साऽलकनन्दा स्वर्गे मन्दाकिनी, पाताले भोगवती, पृथिव्याञ्च गङ्गेति नाम्ना प्रसिद्धा वर्त्तते (५/२४०/३७)।

अनेन प्रकारेण पद्मपुराणे बहूनां महत्त्वपूर्णानां तीर्थमाहात्म्य – श्राद्धविधि – व्रत – स्नान – दान – सत्यभाषण – लोभत्याग – वृक्षरोपण – सरोवरखनन – देवालयनिर्माण – देवपूजन – आमलकीधात्रीपूजनमाहात्म्य – गङ्गागणेशसूर्योपासना – प्राणायामध्यानमहत्त्व – पुराणमहत्त्ववर्णनादीनां विषयाणां वर्णनं विहितम् ।

**बोधप्रशनाः**

१. पद्मपुराणस्य सृष्टिखण्डे कियन्तः अध्यायाः सन्ति ? तत्र च मुख्यप्रतिपाद्यविषयः कः ?

२. श्रीरामस्य श्रीकृष्णस्य च लीलावर्णनं कस्मिन् खण्डे वर्त्तते ?

३. पद्मपुराणानुसारं प्रमुखतीर्थत्वेन किं स्वीक्रियते ?

४. भगवतः सर्वव्यापिनी सत्ता कुत्र कुत्र आधिक्येन वर्त्तते ?

५. भक्तिक्षेत्रे साधुसङ्गस्य का भूमिका ?

६. सात्त्विकपुराणानां पाठेन किं प्राप्यते ?

७. स्वर्गादिषु गङ्गायाः नामानि कानि ?

**स्थानकालादिविवेचनम्** – प्रचलतपद्मपुराणात् ज्ञायते यत् पद्मपुराणस्य स्वरूपमिदं नैव प्राचीनम् । यतो हि पद्मपुराणस्य चतुर्षु संस्करणेषु चतुर्थसंस्करणस्य स्वरूपं प्रचलितपद्मपुराणे प्राप्यते । प्रथम संस्करणं व्यासकृतम्, द्वितीयं बौद्धधर्मस्य ह्राससमये सनातनधर्मस्य च पुनरुत्थान काले जातम्, तृतीयं नारदीयपुराणानुसारेण जातम्, चतुर्थञ्च एकादश–द्वादशशताब्दीमध्ये रामानुज–माधवाचार्यसमये जातं मन्यते । अस्मिन् अन्तिमे चतुर्थसंस्करणे बहूनां साम्प्रदायिकश्लोकानाम् अन्तर्भावः कृतः । ते श्लोकाः पाखण्डिलक्षण–मायावादनिन्दा–तामसादिपुराणभेदकल्पनोर्द्ध्वपुण्ड्रशङ्खचक्रादिचिह्नधारण–द्वैतवादप्रशस्त्यादिविषयकाः सन्ति । रामानुज–माधवाचार्योः दक्षिणदेशोद्भवत्वात् प्रचलितपद्मपुराणस्य स्थानं भारतस्य दक्षिणभागः स्यात् । किञ्च प्रचलितपद्मपुराणस्यास्य उत्तरखण्डे द्रविडदेशीयस्य कस्यचिद् वैष्णवधर्मावलम्बिनः राज्ञः कथा वर्त्तते यः एव शैवानां प्रभावाधिक्यात् प्रभावितः सन् वैष्णवधर्मं त्यक्त्वा विष्णुविग्रहान् निक्षिप्तवान्, विष्णुमन्दिराणि पिहितवान्, प्रजाश्च शैवधर्मग्रहणे प्रेरयामास । अस्य द्रविडदेशीयनृपस्य वर्णनात् ज्ञायते यत् पुराणमिदं तस्मिन् दक्षिणभारतस्य द्रविडदेशे प्रणीतमिति ।

प्रचलितस्यास्य पुराणस्य कालोऽपि नैव प्राचीन इति समालोचकानां मतम् । पुराणस्यास्य स्वर्गखण्डे वर्णितस्य शाकुन्तलोपाख्यानस्य महाभारतवर्णित–शाकुन्तलोपाख्यानेन सह साम्यं न वर्त्तते, अपि तु कालिदासरचितेन अभिज्ञानशाकुन्तलेन सह वर्त्तते । अतः डॉ. विण्टरनित्सस्य तथा डॉ. हरदत्तशास्त्रिणां मते कालिदासः पद्मपुराणस्य कथावस्तु नीत्वा अभिज्ञानशाकुन्तलं रचितवान् इति हेतोः पद्मपुराणस्य कालः पञ्चमशताब्दीतः प्राचीनः स्यात् । परन्तु पुराणविमर्शकारः आचार्यबलदेवउपाध्यायः शकुन्तलायाः अनसूया–प्रियंवदेति सखिद्वयकल्पनां पौराणिकपरम्पराविरोधिनीं प्रतिपाद्य पद्मपुराणीय–शकुन्तलोपाख्यानम् कालिदासकृत अभिज्ञानशाकुन्तलाधारेण रचितमिति प्रमाणयामास । अतः कालिदासानन्तरमेव पद्मपुराणस्य विशेषतः तत्रस्थस्वर्गखण्डस्य रचनाभूदिति हेतोः पद्मपुराणकालः पञ्चमशब्दाद्याः परवर्त्ती स्यादिति तस्य मतम् । किञ्च नागरीलिप्यां मुद्रितस्य, वङ्गलिप्यां हस्तलिखितस्य च पाद्मोत्तरखण्डस्य अध्याय संख्यायां ११० अध्यायानां पार्थक्यात् एतदेव ज्ञायते यत् मूलपुराणे एते अध्यायाः संयोजिताः सन्ति । अस्मिन् अनन्तरं संयोजितांशे रामानुजमतस्य उल्लेखात् हेतोः अंशोऽयं रामानुजकालानन्तरं संयोजित इति ज्ञायते । अपि च द्रविडदेशीयनृपस्य

चरितोल्लेखात् अशोकचाटार्जीमहोदयाः चिन्तयन्ति यत् स नृपः कुलोत्तुङ्गद्वितीयः स्यात् यस्यैव सिंहासनारोहणकालः ११३३ ई. आसीत् । अतः पुराणस्यास्य कालः ततः परवर्त्ती अर्थात् त्रयोदशशताब्दी स्यात् । पद्मपुराणीयोत्तरखण्डे च राधायाः नामनिर्देशात् हेतोः केचन विद्वांसः चिन्तयन्ति यत् १५८५ई. वर्षे प्रतिष्ठितस्य हितहरिवंशगोस्वामिनः राधावल्लभीसंप्रदायस्य प्रभावः उत्तरखण्डे आपतितः इति । अतः तेषां मते १५८५ वर्षात् परं अर्थात् षोडशशताब्द्याः अनन्तरमेव पुराणस्यास्य रचनाकालः स्यादिति ।

**बोधप्रश्नाः**

१. प्रचलितपद्मपुराणे कस्य पद्मपुराणीयसंस्करणस्य स्वरूपं प्राप्यते ?

२. प्रचलितपद्मपुराणस्य रचनास्थानं किम् स्यात् ?

३. शकुन्तलोपाख्यानं पद्मपुराणस्य कस्मिन् खण्डे वर्त्तते ?

४. शकुन्तलोपाख्यानाऽधारेण पद्मपुराणस्य कालः कः स्यात् ?

५. उत्तरखण्डाऽधारेण पद्मपुराणस्य कालः कः स्यात् ?

**३. विष्णुपुराणम्**

अष्टादशपुराणेषु विष्णुपुराणस्य स्थानं तृतीयम् । एतच्च भगवतो विष्णोः दक्षिणबाहुत्वेन स्वीक्रियते । मत्स्यपुराणानुसारं पुराणेऽत्र त्रयोविंशतिसहस्राणि श्लोकाः सन्ति । नारदपुराणमपि श्लोकसंख्यामिमां समर्थयति । किन्तु तन्मते पुराणमिदं भागद्वयात्मकम् – पूर्वभागः उत्तरभागश्चेति । तत्र पूर्वभागे षट् अंशाः वर्त्तन्ते । ये तावत् शक्तिपुत्रेण पराशरेण मैत्रेयाय कथिताः सन्ति । उत्तरभागश्च तदनन्तरं वर्त्तते यत्र सूतः शौनकादिभिः प्रेरितः सन् विष्णुधर्मोत्तरनामकाः नाना धर्मकथाः प्रोक्तवान् इति

(ना. पु. ९४/१-२)। किन्तु अधुना समुपलभ्यमाने विष्णुपुराणे षट् अंशाः षट्सहस्राणि श्लोकाश्च सन्ति । तर्हि उपलभ्यमानं षडंशात्मकं पुराणमिदं मूलविष्णुपुराणस्य आदिभागः पूर्वभागो वाऽस्ति । नारदीयानुसारम् उत्तरभागः विष्णुधर्मोत्तरनाम्ना ख्यातः । परन्तु पूर्वभागेन सह अधुना समुपलब्धस्य विष्णुधर्मोत्तरस्य योगेन श्लोकसंख्यायां वृद्धिहेतोः केचन विद्वांसः डॉ. विलसन्प्रभृतयः विष्णुपुराणस्य उत्तरभागरूपेण विष्णुधर्मोत्तरं नाङ्गीकुर्वन्ति । तथापि नारदपुराणानुसारम् अलवरुणिवर्णनानुसारञ्च विष्णुधर्मोत्तरमेव विष्णुपुराणस्योत्तरभागः स्यात् । विष्णुपुराणस्य पूर्वभागे अधुना षट्सहस्रश्लोकाः सन्ति, तदनन्तरं त्रयोविंशतिसंख्यापूर्त्यर्थं ये सप्तदशसहस्रश्लोकाः अपेक्ष्यन्ते ते मूलविष्णुधर्मोत्तरपुराणे स्युः । अधुना समुपलभ्यमानस्य विष्णुधर्मोत्तरस्य श्लोकसंख्यावृद्धौ प्रक्षिप्तश्लोकानां महती भूमिका स्यात् । अतः एवं निश्चेतव्यं यत् प्रक्षिप्तांशरहितं सप्तदशसहस्रश्लाकात्मकं मूलविष्णुधर्मोत्तरमेव विष्णुपुराणस्य उत्तरभाग एव ।

यद्भवतु साम्प्रतं समुपलब्धं षडंशात्मकविष्णुपुराणं नीत्वा तत्परिचयः समुपस्थाप्यते । अत्र प्रथमेंऽशे २२, द्वितीये १६, तृतीये १८, चतुर्थे २४, पञ्चमे ३६, षष्ठे ८, संकलनया च १२६ अध्यायाः सन्ति ।

**बोधप्रश्नाः**

१. विष्णुपुराणं भगवतो विष्णोः कः अवयवः अस्ति ?

२. नारदीयपुराणानुसारं विष्णुपुराणस्य उत्तरभागः किम् ?

३. सांप्रतं समुपलभ्यमाने विष्णुपुराणे कियन्तः श्लोकाः सन्ति ?

**वर्ण्यविषयाः** – अधुना उपलभ्यमानस्य विष्णुपुराणस्य प्रथमेंऽशे विस्तरेण सृष्टेः वर्णनं वर्त्तते । द्वितीयेंऽशे भूगोलस्य वर्णनं विद्यते । तृतीयेंऽशे चतुर्णामाश्रमाणां धर्मस्य निर्देशः वर्त्तते । चतुर्थे राजवंशवर्णनं विस्तरेण कृतं वर्त्तते । पञ्चमेंऽशे भगवतः श्रीकृष्णस्य चरितं कीर्तितमस्ति । षष्ठे चांशे कलियुगस्वरूपम्, प्रायश्चित्तविधानम्, योगमार्गनिरूपणम्, ज्ञानेन सह भक्तेः सामञ्जस्यप्रतिपादनं

चेति विषयाः सम्यग् वर्णिताः सन्ति ।

अत्र विष्णुपुराणे भगवतो विष्णोः उपासना साम्प्रदायिकसंकीर्णताराहित्यपूर्वकम् एव प्रतिपादिता येन सर्वे वैष्णवाः साम्प्रदायिकसंकीर्णतां विस्मृत्य श्रद्धया सह पुराणस्यास्य मतं स्वीकुर्वन्ति । अतः पुराणस्यास्य मुख्यवर्ण्यविषयोऽस्ति विष्णोः उपासना भक्तिर्वा । भक्तिमार्गद्वारा स्वाभाविकतया साधकस्य मनः भगवदुन्मुखं जायते । नवधाभक्तेः विस्तृतप्रतिपादनं पुराणस्यास्य वैशिष्ट्यमस्ति । भगवतः विष्णोः नाम-गुण-लीलादिस्मरणस्य बहुमाहात्म्यं पराशरेण प्रदर्शितं यत् विष्णुस्मरणेन समस्तपापराशिः भस्मसाद् भवति । मोक्षश्चअनायसेन प्राप्यते । किन्तु स्वर्गप्राप्तिः तत्र विघ्नरूपाऽनुमीयते -

विष्णुसंस्मरणात् क्षीणसमस्तक्लेशसंचयः ।
मुक्तिंप्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते ।। वि.पु. २/६/४०

न केवलं विष्णोः स्मरणम् अपि तु तद्यशोगुणादीनां श्रवणं कीर्तनं, कृतस्य कर्मणः तत् समर्पणं च अत्यावश्यकमिति मत्वा पुराणेऽस्मिन् त्याग-संयम-साधनादीनां महत्त्वपूर्णं चित्रणं कृतं वर्त्तते । एतेषां त्यागादीनां दृष्टान्तरूपेण ध्रुव-प्रह्लाद-सगर-भगीरथ-नहुष-ययाति-जमदग्नि-विश्वामित्र-केशिध्वजादीनां चरितं समुपन्यस्तमस्ति । सर्वेषु चरितेषु प्रह्लादचरितम् अत्र भक्तिरससिक्ततया समुपस्थापितं वर्त्तते । एतच्चरितमाध्यमेन भक्तेः सुमाहात्म्यं प्रकाशितम्, भगवतश्च भक्तप्रियत्वं प्रतिपादितमस्ति ।

पुराणेऽस्मिन् सकलपुरुषार्थोपपादकानां शास्त्राणां प्रतिपादनं कृतं दृश्यते । अत्र धर्मार्थकाममोक्षाणां प्राप्तये तत्तच्छास्त्राणाम् उपदेशः तत्र तत्र प्राप्यते । वर्णाश्रमधर्माणां व्यवस्थया जनान् संयमयितुं तत्र तत्र प्रयासाः कृताः । अर्थप्राप्तये पुराणेऽस्मिन् पशुपालन-कृषि-वाणिज्यादीनां कृते अत्यधिकं महत्त्वं प्रदत्तमस्ति । किं चात्र खनिजपदार्थानाम् उत्पादन-वितरणादीनां कृते सम्यक् अन्वेषणं प्रस्तुतमस्ति । राजनीतिविषये राज्योत्पत्ति-सिद्धान्त-विकाश-प्रजापालन-दायविभाजन-राजकर-राष्ट्रियभावना प्रभृतयः विषयाः विस्तरेण विवेचिताः सन्ति । अत्र च रथयुद्ध-पदातियुद्ध-मल्लयुद्धादीनां बहुविधयुद्धानाम् उदाहरणानि प्रदत्तानि । परमपुरुषार्थस्य मोक्षस्य प्राप्तये मानवमात्रम् उद्बोधयितुं प्रयासः कृतोऽस्ति । एवं पुरुषार्थचतुष्टयप्राप्तिसाधनानां चतुर्दशविद्यानां चर्चा पुराणेऽस्मिन् कृता । स्वकीयसभ्यता-संस्कृत्योः वास्तविकज्ञानाय पुराणेऽस्मिन् सभ्यतासंस्कृत्योः महनीयतत्त्वानां विवेचनं कृतमस्ति ।

यद्यप्यस्मिन् पुराणे भगवतः विष्णोः महिमा हृदयस्पर्शिरूपेण प्रतिपादितोऽस्ति तथापि देवतान्तराणां निन्दाऽत्र निषिद्धास्ति । विष्णुना सह न केवलं देवानामपि तु परिदृश्यमानजगतः साम्यं पुराणेऽत्र प्रदर्शितम् । स्वयं भगवान श्रीकृष्णः भगवता शिवेन सह जगता च सह आत्मनः अभेदं प्रदिपादयति (पु.प. – पृ. १७३ )।

एवं पुराणेऽस्मिन् बहुविधविषयेषु वर्णितेष्वपि पुराणमिदम् आत्मनः पुराणत्वं साधयितुं सर्गादिपञ्चविषयान् प्राधान्येन प्रतिपादयति । सृष्टेः विस्तृतविवरणं, प्रलयस्य भेदप्रदर्शनपूर्वकवर्णनम् ऋषिणां मुनिनां राज्ञां च वंशस्येतिवृत्तसमुपस्थापनं, विशिष्टनृपाणाम् उपाख्यानकीर्तनं, मन्वन्तराणां नामनिर्देशपूर्वकं विभिन्नकथानकानाम् अवतरणं चेति विषयाः सम्यक्तया पुराणेऽस्मिन् विवेचिताः सन्ति ।

**बोधप्रश्नाः**

१. विष्णुपुराणस्य द्वितीयेंऽशे मुख्यतः किं वर्णितम् ?

२. भगवान् श्रीकृष्णः शिवसमक्षं किं प्रकाशयति ?

३. प्रह्लादचरितमाध्यमेन किं प्रतिपादितमस्ति ?

**स्थानकालादिविवेचनं** – पुराणस्यास्य रचनास्थानविषये यद्यपि न कापि स्पष्टसूचना कुत्रापि समुपलभ्यते तथापि तद्विषये किमपि अनुमातुं शक्यते । तमिलसाहित्ये एकः महत्त्वपूर्णः काव्यग्रन्थोऽस्ति ‘मणिमेखले’ति । ग्रन्थेऽस्मिन् एकः उल्लेखोऽस्ति विष्णुपुराणविषयकः । अत्राऽयं प्रसङ्गो यत् कस्यांचित् शास्त्रार्थसभायां वेदान्तादिदर्शनशास्त्रनिपुणाः सर्वे स्वमतोपस्थापनाय भागग्रहीतारः आसन् । तेषु च विष्णुपुराणज्ञोऽप्यासीदिति तमिलभाषायां लिखितमस्ति । अत्र केवलं विष्णुपुराणस्योल्लेखः अस्ति न तु भागवतादीनाम् अन्येषां वैष्णवपुराणानाम् । मणिमेखलाकाव्यस्य रचनाकालः ई. द्वितीयशताब्दी स्वीक्रियते इति हेतोः एतदपि ज्ञायते यत् द्वितीयशताब्दीतः पूर्वमपि तत्र तमिलप्रदेशे

विष्णुपुराणस्य महान् प्रचारः आसीदिति । अतः एतदेव अनुमातुं शक्यते यत् तस्मिन् प्रदेशे रचितत्वात् स्वल्पकालेनैव पुराणस्यास्य लोकप्रियता जाता । अतः पुराणस्यास्य रचनास्थानं तमिलप्रदेशः स्यादिति अनुमातुं शक्यते (पु.वि. – पृ. ५४४)।

पुराणस्यास्य रचनाकालविषये बहुमतानि समालोचकानां वर्त्तन्ते । तेषु अन्यतममस्ति स्थानविषये समुपस्थापितं मतमेव । यस्मिन् मणिमेखलाग्रन्थे विष्णुपुराणज्ञस्य प्रसङ्गः वर्त्तते स एव ई. द्वितीयशतके रचितः आसीत् । तदा च विष्णुपुराणस्य पाठ–प्रवचनमाध्यमेन बहुप्रचारः आसीदिति तद्ग्रन्थात् ज्ञायते । अतः लोकप्रियतार्थं यदि न्यूनातिन्यूनं शतकम् एकम् आवश्यकं तर्हि पुराणस्यास्य रचना ई. प्रथमशतकात् अनन्तरं नैव स्यात् इति ।

विष्णुपुराणस्य रचनाकालः प्रथमशतकसमीपवर्तीति मतं वाचस्पतिमिश्राणां योगभाष्योपरि तत्त्ववैशारदीनाम्न्याः स्वटीकायाः आधारेण पुष्टीभवति । नवमशतकोत्पन्नः वाचस्पतिमिश्रः योगभाष्यस्य तत्त्ववैशारदीनाम्न्यां स्वटीकायां २/३२, २/५२, २/५४ सूत्रेषु विष्णुपुराणस्य श्लोकान् उद्धृतवान् । 'स्वाध्यायाद् योगमासीत' इति भाष्यस्य टीकायां स लिखति – अत्रैव वैयासिकीं गाथाम् उदाहरतीति । अस्माद् वाक्यात् ज्ञायते यत् भाष्ये उद्धृतं 'स्वाध्यायाद् योगमासीते'ति वचनं व्यासस्यैव । वचनं चेदं विष्णुपुराणस्य ६/६/२२ श्लोकरूपेण प्राप्यते । किञ्च योगभाष्यस्य वचनमेकं वात्स्यायनकृतन्यायभाष्ये १/२/२६ उपलभ्यते । अस्मात् ज्ञायते यत् वात्स्यायनसमयात् पूर्वमेव योगभाष्यकारस्य समयः स्यात् । वात्स्यायनस्य समयः द्वितीय/तृतीयशतकं स्यात् । अतः योगभाष्यकारस्य व्यासदेवस्य समयः तत्पूर्ववर्त्ती भवेत् । भाष्यवचनस्य विष्णुपुराणे स्थितत्वात् विष्णुपुराणस्यापि समयः द्वितीयशतकात् पूर्वम् अर्थात् प्रथमशतकं तत्पूर्वं वा स्यादिति ।

ज्योतिषविषयकतथ्यानाम् आधारेणापि विष्णुपुराणस्य समयः अनुमातुं शक्यते । पुराणेऽस्मिन् २/९/१६ श्लोके नक्षत्राणाम् आरम्भः कृत्तिकातः कृतोऽस्ति । परन्तु प्रायः षष्ठशताब्द्यां जातस्य वराहमिहिरस्य मतानुसारं पूर्वं नक्षत्राणां गणना कृत्तिकातः क्रियते स्म । सा वराहमिहिरकाले अश्विनीतः अभूदिति । अस्माद् ज्ञायते यत् कृत्तिकातः नक्षत्रगणनात् हेतोः विष्णुपुराणस्य कालः षष्ठशतकात् पूर्वमेव स्यात् । नक्षत्राणाम् इव राशीनामपि उल्लेखः विष्णुपुराणे बहुत्र समुपलभ्यते । ज्योतिर्विदां मते संस्कृतग्रन्थेषु प्रथमतः याज्ञवल्क्यस्मृतौ एव राशीनां समुल्लेखः प्राप्यते । अस्मात् हेतोः विष्णुपुराणस्य

कालः याज्ञवल्क्यकालात् अनन्तरं द्वितीयशतकमेव स्यात् ।

कलियुगीयनृपाणां वर्णनप्रसङ्गे विष्णुपुराणं गुप्तनृपतीनां प्रारम्भिकम् इतिहासं समुपस्थापयति । तत्र गुप्तानां साम्राज्यं साकेत-प्रयाग-मगधेषु व्याप्तमासीदिति सूचितमस्ति । इतिहासाद् ज्ञायते यत् प्रथमचन्द्रगुप्तस्य राजत्वे गुप्तसाम्राज्यं साकेत-प्रयाग-मगधेषु व्याप्तमासीत् । अतः विष्णुपुराणं प्रथमचन्द्रगुप्तकालीनं स्यात् । प्रथमचन्द्रगुप्तस्य शासनकालः ई.३२०-३२६ मन्यते । अतः विष्णुपुराणस्य कालः चतुर्थशतकं स्यात् ।

सी. वी. वैद्यः कथयति यत् यवनजातीयैः कैंकिलैः आन्ध्रे ५७५-९०० पर्यन्तं शासनं कृतम् । विष्णुपुराणे तेषां कैंकिलानाम् उल्लेखात् पुराणस्यास्य कालः नवमशताब्दी स्यात् ।

भारतप्रसिद्धः ज्योतिर्विद् ब्रह्मगुप्तः ई.६२८ वर्षे विष्णुपुराणस्य उत्तरभागस्य विष्णुधर्मोत्तरस्याधारेण ब्रह्मसिद्धान्तनामकस्य ग्रन्थस्य निर्माणं कृतवान् इति ज्ञायते । अतः विष्णुपुराणस्य रचना ब्रह्मगुप्तात्पूर्वं षष्ठशतके स्यात् ।

एवं विष्णुपुराणस्य रचनाकालविषये बहुमतानि सन्ति । तेषु द्वितीयशतकमध्ये पुराणस्यास्य रचना स्यादिति बहुप्रमाणसत्त्वात् मतमिदं स्वीकर्तुं शक्यते ।

विष्णुपुराणस्य प्रामाणिकता बहुभिः आचार्यैः दार्शनिकैश्च स्वस्वग्रन्थमाध्यमेन प्रमाणीकृताऽस्ति । पुराणस्यास्य बहुश्लोकाः रामानुजाचार्यैः, मध्वाचार्यैः, मिताक्षराकारैः, कल्पतरुकारैश्चेत्यादिभिः बहुभिः वैष्णवैः धर्मशास्त्रनिबन्धकारैश्च समुद्धृताः सन्ति । पुराणस्यास्य बहुटीकाः बहुभिः आचार्यैः कृता वर्त्तन्ते । तासु चित्सुखमुनि-विष्णुचित्त-रत्नगर्भाचार्य-जगन्नाथपाठक-नृसिंहभट्ट-श्रीधरस्वामिनां टीकाः उल्लेखनीयाः सन्ति । परन्तु तासु तिस्रः एव प्रसिद्धाः टीकाः सम्प्रति समुपलभ्यन्ते - १)श्रीधरस्वामिनां श्रीधरी, २)विष्णुचित्तस्य विष्णुचित्तीया, ३)रत्नगर्भाचार्यस्य वैष्णवाकूतचन्द्रिका चेति । एतासु विष्णुचित्तीया टीका महत्त्वपूर्णा विस्तृता चास्ति ।

अधुना प्रचलितं षडंशात्मकं विष्णुपुराणम् आकारेण क्षुद्रमपि दार्शनिकदृष्ट्या, वैष्णवसिद्धान्तदृष्ट्या, भक्तितत्त्वविवेचनदृष्ट्या च सुमहत्त्वपूर्णं सुप्रसिद्धं प्रामाणिकञ्च वर्त्तते इति ।

**बोधप्रश्नाः**

१. विष्णुपुराणस्य रचनास्थानं कुत्र स्यादिति अनुमीयते ?

२. कस्य ग्रन्थस्याधारेण रचनास्थानमिदम् अनुमीयते ?

३. वाचस्पतिमिश्राणां तत्त्ववैशारदीटीकाधारेण विष्णुपुराणस्य कः कालः अनुमीयते ?

४. राशीनाम् उल्लेखाधारेण विष्णुपुराणस्य कः कालः स्यात् ?

५. ब्रह्मगुप्तः विष्णुपुराणाऽधारेण कं ग्रन्थं रचितवान् ?

६. विष्णुपुराणोपरि रत्नगर्भाचार्यद्वारारचितायाः टीकायाः नाम किम् ?

**प्रथमांशसारः**

अस्मिन् प्रथमांशे पाठ्यरूपेण यानि त्रीणि पुराणानि स्वीकृतानि तेषु प्रथममस्ति ब्रह्मपुराणम् । अतः आदौ ब्रह्मपुराणस्य परिचयप्रसङ्गे अष्टादशपुराणेषु तस्य स्थानं, विष्णोः अवयमत्वेन स्वरूपं, श्लोकसंख्या, अन्तर्विभाजनं, वर्ण्यविषयोपस्थापनं, सेश्वरसांख्य-प्रतिपादकत्वं, रचनास्थानाऽनुमानं, रचनाकालानुमानम्, एतत्प्राचीनत्वाऽर्वाचीनत्वसमीक्षणं चेति विषयाः सम्यग् विवेचिताः । ततः द्वितीयपुराणस्य पद्मपुराणस्य परिचयः समुपस्थापितः । तत्प्रसङ्गे पुराणस्यास्य विष्णुहृदयत्वं, श्लोकसंख्या, अन्तर्विभाजनम् अर्थात् भाग-खण्डादिविभागः, वर्ण्यविषयोपस्थापनं, श्रीकृष्णनाम्नः परमतीर्थत्वप्रतिपादनं, भगवतः सर्वमयत्वं, भक्तिविवेचनं, पुराणानां सात्त्विकादिभेदप्रदर्शनं, गङ्गाचरितादिसमुपस्थापनं, रचनास्थानकालानुमानं, एतत्प्राचीनत्वाऽर्वाचीनत्वसमीक्षणं चेति विषयाः विचारिताः सन्ति । तथा च तृतीयपुराणरूपेण विष्णुपुराणस्यापि परिचयः प्रदत्तः । पुराणमिदं पुराणविग्रहस्य भगवतो विष्णोः दक्षिणबाहुत्वेन स्वीकृतम् । अत्र च त्रयोविंशतिसंहस्राणि श्लोकाः

सन्ति । नारदीयपुराणानुसारं पुराणस्यास्य अन्तर्विभाजनं प्रदर्शितम् । साम्प्रतं समुपलभ्यमानस्य विष्णुपुराणस्य तत् पूर्वभागत्वं, विष्णुधर्मोत्तरपुराणस्य च तदुत्तरभागत्वं नारदीयवचनानुसारं प्रमाणीकृतम् । तदनन्तरं पुराणस्यास्य वर्ण्यविषयोपस्थापनप्रसङ्गे षडंशानां विषयनिर्देशः, भक्तितत्त्वविवेचनं, भूगोलवर्णनं, वंशावलीसमुपस्थापनं, श्रीकृष्णचरितकीर्तनं, रचनास्थानकालादिसंभावनं, तन्महत्त्वं चेति विषयाः सम्प्रदर्शिताः । अनेन प्रकारेण पुराणत्रयस्य परिचयः संक्षेपेण प्रथमांशेऽस्मिन् प्रदत्तः ।

**सहायकग्रन्थसूची** – १) पुराणपर्यालोचनम्, २) पुराणविमर्शः, ३) अष्टादशपुराणानि ।

## आदर्शप्रश्नाः

**क) निबन्धात्मकप्रश्नाः** २०/१५

१. ब्रह्मपुराणस्य वर्ण्यविषयान् समुपस्थाप्य तद्रचनास्थानं कालञ्च विवेचयत ।

२. पद्मपुराणस्य स्वरूपं वर्ण्यविषयांश्च सम्यग् उपस्थापयत ।

३. विष्णुपुराणस्य स्वरूपं रचनास्थानकालौ च समीक्षध्वम् ।

**ख) विश्लेषणात्मकप्रश्नाः** १२/१०

१. पुराणकृद्व्यासस्य परिचयः प्रदीयताम् ।

२. पद्मपुराणस्य रचनास्थानकालयोः सूचनां प्रदत्त ।

३. विष्णुपुराणस्य वर्ण्यविषयान् समुपस्थापयत ।

**ग) लघूत्तरीयाः प्रश्नाः**

५

१. ब्रह्मपुराणस्य स्वरूपं प्रकाश्यताम् ।

२. अष्टादशमहापुराणप्रणयने हेतुं प्रदर्श्य तेषां नामानि लिखत ।

३. विष्णुपुराणस्य त्रयोविंशतिसहस्रात्मिकायाः श्लोकसंख्यायाः समाधानं कुरुत।

४. पुराणवाङ्मयस्य प्राथमिकस्वरूपं प्रकाशयत ।

**घ) एकाङ्कप्रश्नाः**

१. ब्रह्मपुराणं स्वरूपतः पुराणविग्रहस्य विष्णोः कः अवयवोऽस्ति ?

२. ब्रह्मपुराणे कियन्तः भागाः सन्ति ? के च ते ?

३. ब्रह्मपुराणस्य कालः कः स्यात् ?

४. पद्मपुराणे कियन्तः श्लोकाः सन्ति ?

५. पद्मपुराणस्य उत्तरभारतीयपाठे कति खण्डाः सन्ति ? के च ते ?

६. पद्मपुराणस्य रचनास्थानं किम् अनुमीयते ?

७. समुपलभ्यमाने विष्णुपुराणे कियन्तः अंशाः श्लोकाश्च सन्ति ?

८. विष्णुस्मरणस्य किं माहात्म्यम् ?

९. मणिमेखलाग्रन्थः कया भाषया रचितः ?

१०. ब्रह्मगुप्तः कः ? तस्य ग्रन्थाधारेण विष्णुपुराणस्य कः कालः अनुमितः ?

**उत्तराणि –**

१. मस्तकम्, २. द्वौ भागौ, पूर्वभागः उत्तरभागश्चेति, ३. त्रयोदशशताब्द्यां ततः पूर्वं वा, ४. पञ्चपञ्चाशत्सहस्राणि, ५. पञ्चखण्डाः; सृष्टि-भूमि-स्वर्ग-पाताल-उत्तरनामानः, ६. दक्षिणभारतीयद्रविडदेशः, ७. षट्अंशाः षट्सहस्राणि श्लोकाश्च, ८. सर्वपापविनाशः मुक्तिप्राप्तिश्च, ९. तमिलभाषया, १०. विशिष्टज्योतिर्वित्, षष्ठशतकम् ।

❖❖❖

# द्वितीयोंऽशः

# शिवपुराणम्/वायुपुराणम्, श्रीमद्भागवतम्/देवीभागवतम्

**प्रस्तावना –** अष्टादशपुराणेषु प्रथम-द्वितीय-तृतीयानां ब्रह्म-पद्म-विष्णूनां परिचयः पूर्वस्मिन् प्रथमेंऽशे अस्माभिः प्राप्तः । एतदनन्तरं तत्परवर्तिनां परिचयार्थम् अस्माकं मनसि स्वाभाविकतया आग्रहः स्यात् । अतः तत्परवर्त्तिनोः चतुर्थपञ्चमपुराणयोः परिचयः प्रस्तूयते । अत्र चतुर्थस्थाने कैश्चित् समालोचकैः शिवपुराणस्य, कैश्चिच्च वायुपुराणस्य ग्रहणं क्रियते । अतः चतुर्थस्थाने यदा द्वयोः पुराणयोः विकल्पादपि ग्रहणं भवति, तदा वयं द्वयोरेव परिचयं प्राप्तुम् इच्छामः । तथा च पञ्चमस्थाने केषांचित् मते श्रीमद्भागवतम् केषांचिच्चमते देवीभागवतम् गृह्यते । अतः पञ्चमस्थानीयस्य पुराणस्य ज्ञानाय अस्माभिः द्वयोरेव श्रीमद्भागवत-देवीभागवतयोः परिचयार्थं अभिलषामः । तर्हि यथाक्रमं वयं शिवपुराणादीनां सर्वेषां चतुर्णामेव परिचयार्थं प्रवर्त्तामहे ।

**उद्देश्यम्** – अस्मिन् द्वितीयेंऽशे चतुर्थपुराणस्थाने शिवपुराण-वायुपुराणयोः, पञ्चपुराणस्थाने च श्रीमद्भागवत-देवीभागवतयोः परिचयप्राप्त्यर्थं निम्नोक्तबिन्दून् आधारीकृत्य अग्रेसरामः । ते बिन्दवो यथा –
- प्रत्येकं पुराणस्य स्वरूपम्
- अन्तर्विभाजनम्
- वर्ण्यविषयाः
- रचनास्थानसम्भावना
- रचनाकालसम्भावना
- वैशिष्ट्यञ्चेत्यादि ।

## ४. (क) शिवपुराणम् –

अष्टादशपुराणेषु चतुर्थपुराणरूपेण शिवपुराणस्य ग्रहणं विष्णु-पद्म-श्रीमद्भागवत-मार्कण्डेय-ब्रह्मवैवर्त्त-कूर्म-वराह-लिङ्ग-स्कन्दपुराणेषु कृतम् । अतः शिवपुराणम् चतुर्थपुराणत्वेन स्वीकृत्य तत्स्वरूपं प्रथमतः प्रस्तूयते । पुराणमिदं पुराणविग्रहस्य भगवतः विष्णोः वामबाहुत्वेन स्वीकृतम् । अत्र चतुर्विंशतिसहस्राणि श्लोकाः सन्ति । पुराणमिदं सप्तसंहितासु विभक्तम् – १. विद्येश्वरसंहिता,

२. रुद्रसंहिता, ३. शतरुद्रसंहिता, ४. कोटिरुद्रसंहिता., ५. उमासंहिता, ६. कैलाससंहिता, ७. वायवीयसंहिता चेति । तत्राऽपि द्वितीयायां रुद्रसंहितायां सृष्टि-सती-पार्वती-कुमार-युद्धनामानि पञ्चखण्डानि वर्त्तन्ते । सप्तम्यां वायवीयसंहितायां च पूर्वार्द्धम् उत्तरार्द्धञ्चेति द्वौ भागौ स्तः । एवं सप्तसु संहितासु क्रमशः २५, १९७ (२० + ४३ + ५४ +२० + ५९), ४२, ४३, ५१, २३, ७६ (३५ + ४१); संकलनेन ४५७ अध्यायाः सन्ति ।

किञ्च पुराणस्यास्य वायवीयसंहितायाः पूर्वार्द्धे द्वादशसंहितात्मकस्य लक्षश्लोकविशिष्टस्य मूलशिवपुराणस्य सङ्केतः प्रदत्तः । द्वादशसंहितानां नामानि यथा – १. विद्येश्वरसंहिता, २. रुद्रसंहिता, ३. विनायकसंहिता, ४. उमासंहिता, ५. मातृसंहिता, ६. एकादशरुद्रसंहिता, ७. कैलाससंहिता, ८. शतरुद्रसंहिता, ९. कोटिरुद्रसंहिता, १०. सहस्ररुद्रसंहिता, ११. वायवीयसंहिता, १२. धर्मसंहिताचेति ।

परन्तु अतिविस्तृतस्यास्य द्वादशसंहितात्मकस्य शिवपुराणस्य संक्षेपं कृत्वा व्यासदेवः तत् सप्तसंहितात्मकं चतुर्विंशतिसहस्रश्लोकात्मकं च कृत्वा प्रवर्त्तयामास –

व्यासेन तत्तु संक्षिप्तं चतुर्विंशत्सहस्रकम् ।
शैवं तत्र पुराणं वै चतुर्थं सप्तसंहितम् ।। शि. पु. वा. स. पू. १/५८

**बोधप्रश्नाः**

१. शिवपुराणं विष्णोः कः अवयवः ?

२. शिवपुराणे कियन्तः अध्यायाः सन्ति ?

३. रुद्रसंहिता कियत्सु खण्डेषु विभक्ता ? तेषां च नामानि कानि ?

**वर्ण्यविषयाः** – शिवपुराणस्य सप्तसु संहितासु भगवतः शिवस्य माहात्म्य-चरितादिसंबद्धाः बहुकथाः सन्निवेशिताः सन्ति अत्र च शैवव्रतोपवास-पूजाप्रकार-तपस्या-योगसाधनादीनां वर्णनं महत्त्वपूर्णमस्ति । प्रसङ्गवशाच्च ब्रह्माण्ड-भूमण्डल-भारतवर्ष-द्वीप-समुद्र-खगोल-नरक-राजवंश-कश्यपवंशादिवर्णनमपि मनोहरतया कृतं विद्यते ।

तत्र सप्तसु संहितासु प्रथमायां विद्येश्वरसंहितायां पुराणस्यास्य उपक्रमः प्रदर्शितः । तीर्थराजे प्रयागे मुनिभिः कृतस्य यज्ञस्य दर्शनार्थम् आगताय सूताय कलौ वर्णाश्रमधर्मस्य यदा क्रमशो ह्रासो भवति तदा कलिहतजीवानां परमकल्याणं कथं स्यादिति मुनयः प्रश्नं चक्रुः । तेषां प्रश्नानुसारं च सूतः शिवपुराणस्य कलिदोषविनाशकत्वं प्रतिपाद्य पुराणस्यास्य संहिताभेदनिरूपणं, शिवलिङ्गार्चनान्मुक्तिप्राप्तिः, विविधपुष्प-विल्वपत्रैश्च शिवपूजनस्य फलं, भस्म-रुद्राक्षधारणमहत्त्वं शिवनिर्माल्यप्राप्तिनिर्णयः, पार्थिवेश्वरपूजनं चेत्यादिविषयान् सविस्तरं वर्णयामास ।

द्वितीयायां रुद्रसंहितायां प्रथमे सृष्टिखण्डे निर्गुणस्य शिवस्य शक्तिसम्बन्धात् प्रपञ्चरचनावर्णनं, शिवदर्शनार्थं स्थितयोः ब्रह्मविष्ण्वोः ओंकारनादश्रवणं, ततो ब्रह्माण्डोऽत्पतिः, शिवस्य पञ्चमुखसगुणमूर्तिप्रादुर्भावः, विशेषपुष्पैः शिवलिङ्गपूजनस्य विशेषफलवर्णनं, ततोऽनेकविधसृष्टिवर्णनं चेति विषयाः प्रकाशिताः । ततः द्वितीये सतीखण्डे दक्षकन्यायाः सत्याः पावनं चरितं ४३ अध्यायेषु कीर्तितमस्ति । अत्र सतीशिवयोः विवाहानन्तरं प्रमोदार्थं भ्रमणकाले तद्वने सीताविरहिणः श्रीरामस्य दर्शनमात्रेण प्रणमन्तं शिवं दृष्ट्वा स्वयं सती सीतारूपं धृत्वा श्रीरामस्य परीक्षां कृतवतीति प्रसङ्गः समुपस्थापितः । दक्षयज्ञे योगाग्निना स्वशरीरं दग्धवत्याः सत्याः पवित्रपातिव्रत्यधर्मस्य सुमहत्त्वं प्रतिपादितमस्ति सतीखण्डेऽस्मिन् । ततः तृतीये पार्वतीखण्डे ५५ अध्यायेषु देहत्यागान्ते सत्याः द्वितीयजन्मरूपेण पार्वतीनाम्ना पर्वतराजहिमालयस्य पत्न्यां मेनायाम् आविर्भावः, पूर्वपतिं शिवं पतित्वेन प्राप्तुं तस्याः तपश्चरणं, तत्परीक्षार्थं ब्रह्मचारिवेशेन आगतेन शिवेन सह तत्संवादश्चेति विषयाः कीर्त्तिताः । ततश्च चतुर्थकुमारखण्डे २० अध्यायेषु कार्तिकेयस्य जन्म, तारकासुरेण युद्धं, गणेशोत्पत्तिः, तद्देहे गजमुखयोजनं, तस्य अग्रपूज्यत्वं, तद्विवाहादिकञ्च वर्णितम् । ततः पञ्चमे युद्धखण्डे ५९ अध्यायेषु त्रिपुरासुर-जलन्धरादिदैत्यानां देवैः सह युद्धवर्णनादिकं वर्त्तते । एवं पञ्चखण्डात्मिकायाः रुद्रसंहितायाः वर्ण्यविषयाः सन्ति ।

अनन्तरं तृतीयायां शतरुद्रसंहितायां ५२अध्यायेषु शिवस्य अष्टमूर्त्तिरूपत्वं, शिलादिमुनेः नन्दीश्वरं पुत्ररूपेण प्राप्तुम् इच्छया तपश्चरणं च वर्णितम् । एतत्प्रसङ्गे शिवस्य आशुतोषत्वं प्रतिपादितम् (शि.पु. ३/३७/५७-५८) । ततः वेदव्यासोपदेशेन इन्द्रकीलपर्वते तपः कुर्वते अर्जुनाय पाशुपतास्त्रप्रदानकाले शिवेन सह अर्जुनस्य युद्धम् अतीव हृदयस्पर्शिरूपेण वर्णितम् ।

ततः चतुर्थ्यां कोटिरुद्रसंहितायां ४३ अध्यायैः द्वादशज्योतिर्लिङ्गानां काशीस्थलिङ्गानां च नामकीर्तनपूर्वकं माहात्म्यकीर्तनम्, अनसूयात्रितपोवर्णनं च महत्त्वपूर्णं वर्त्तते ।

पञ्चम्याम् उमासंहितायां ५१अध्यायैः पुत्रकामस्य श्रीकृष्णस्य तपश्चरणम्, नरकपातालवर्णनं, स्वायंभुवमनुवंशवर्णनं, देवीचरितप्रसङ्गे सुरथ-वैश्यचरितचित्रणं चेति विषयाः वर्णिताः ।

ततः षष्ठ्यां कैलाससंहितायां २३ अध्यायेषु ओंकारस्वरूपं, मन्त्रदीक्षाग्रहणविधिः, विरजाहोमविधानं, प्रत्यभिज्ञादर्शनसिद्धान्तविवेचनं, स्वप्ने शिवकृतोपदेशानुसारं वसुगुप्तेन प्राप्तशिवसूत्राणां तत्संबद्धवार्त्तिकानां च निर्देशश्चेत्यादिविषयाणां प्रतिपादनं वर्त्तते ।

सप्तम्यां वायवीयसंहितायां मुख्यतः शैवागमसमर्थितायाः उपासनापद्धतेः विशदं वर्णनं समुपलभ्यते ।

अनने प्रकारेण शिवपुराणे भगवतः शिवस्य, देव्याः, गणेशकार्त्तिकेययोः, तद्भक्तानां च चरितवर्णनेन सह शैवागमस्य सिद्धान्तानां प्रतिपादनं बहुलतया कृतं दृश्यते । प्रतियुगं शिवस्य नानावतारणधारणं, शिवपूजायाः तत् आवरणपूजायाश्च क्रमः, पञ्चाक्षरमन्त्रजपविधिः, शिवलिङ्गप्रतिष्ठाविधानं चेत्यादीनां सम्यग् विवेचनं पुराणेऽत्र प्राप्यते एवं शैवज्ञानसिद्धेः शिवप्राप्तेश्च कृते पुराणमिदं महदुपकारकमस्तीति ।

**बोधप्रश्नाः**

१. पार्वत्याः तपश्चरणं शिवपुराणस्य कुत्र वर्णितम् ?

२. शिवेन सह अर्जुनस्य युद्धं कस्यां संहितायां वर्णितम् ?

३. कैलाससंहितायां कति अध्यायाः सन्ति ?

**शिवपुराणस्य कालः** - शिवपुराणस्य बहुलप्रचारः तमिलदेशे प्राचीनकालेऽपि आसीत् । तमिलभाषयां शिवपुराणस्य त्रयाणाम् उपाख्यानानाम् अनुवादः अधुनाऽपि प्राप्यते । भगवतः शिवस्य शरभावतारकथा शरभपुराणनाम्ना, शतरुद्रसंहितायाः १०-१२अध्यायाः, रुद्रसंहितायाः द्वितीयखण्डस्य

३८-३९अध्यायौ दधीचिपुराणनाम्ना च तमिलभाषानुवादरूपेण प्राप्यन्ते । एषाम् अनुवादकोऽस्ति तिरुमल्लैनाथः । अस्य च कालः त्रयोदशशताब्दी अस्ति । अतः शिवपुराणस्य कालः नूनमेव ततः पूर्वं स्यात् ।

अलवरुणी स्वकीये भारतवर्णनग्रन्थे पुराणानां सूचीद्वयं प्रदत्तवान् । प्रथमसूच्यां वायुपुराणस्य द्वितीयसूच्यां च तत्स्थाने शिवपुराणस्य नाम स्वीकृतम् । अस्माद् ज्ञायते यत् अलवरुणीकृत-भारतवर्णनग्रन्थरचनाकालात् पूर्वमेव शिवपुराणस्य रचनाऽभूदिति । भारतवर्णनग्रन्थरचनाकालः ई. १०३०वर्षम् । अतः ततः पूर्वं दशमशताब्द्यामेव शिवपुराणं रचितं स्यात् ।

पुराणेऽस्मिन् कैलाससंहितायां १६-१७अध्याययोः प्रत्यभिज्ञानदर्शनस्य सिद्धान्ताः स्पष्टतया प्रतिपादिताः सन्ति । तत्रैव शिवसूत्रग्रन्थस्य द्वयोः सूत्रयोः, तत्संबद्धवार्तिकस्य च स्पष्टनिर्देशः वर्तते । शिवसूत्रग्रन्थस्थसूत्राणां द्रष्टाऽस्ति वसुगुप्तः । अस्य वसुगुप्तस्य शिष्यः आसीत् कल्लटः । अयम् अवन्तिवर्मणः राजत्वकाले महापुरुषरूपेण सम्मानितः आसीत् । अतः अवन्तिवर्मणः कालः नवमशतकमेवाऽस्य कालः स्यात् । शिष्यकालानुसारं गुरोः वसुगुप्तस्यापि कालः किञ्चित्पूर्ववर्ती भवेत् । पुनः शिवसूत्रवार्तिककारः भास्करः प्रायः शतवर्षानन्तरं जातः सन् वार्तिकं रचयामासेति प्रमाणसत्त्वात्, उभयोः शिवसूत्र-तद्वार्तिकयोः उद्धरणात् हेतोः शिवपुराणस्य कालः तत्परवर्त्ती दशमशतकस्य अन्तिमभागः एकादशशतकस्य आदिभागो वा स्यादिति सम्भाव्यते ।

**बोधप्रश्नाः**

१. तिरुमल्लैनाथः कः ? तस्य कालानुसारं शिवपुराणं किंकालिकं मन्यते ?

२. अलवरुणिकृत-पुराणसूच्याः आधारेण शिवपुराणं कदा रचितं स्यात् ?

३. वसुगुप्तः कः ? स च कस्य ग्रन्थस्य सूत्राणां द्रष्टाऽसीत् ?

### ४. (ख) वायुपुराणम् -

मत्स्यपुराणानुसारं वायुपुराणं श्वेतकल्पप्रसङ्गे वायुना प्रोक्तं, धर्मतत्त्व-रुद्रमाहात्म्ययोः प्रतिपादकं, चतुर्विंशतिसहस्रश्लोकात्मकं चास्ति (म.पु. ५३/१८)। नारदीयपुराणमते च पुराणमिदं

श्वेतकल्पप्रसंङ्गे वायुना प्रोक्तं, शिवमहिमप्रकाशकं, शिवलोकप्रापकं, चतुर्विंशतिसहस्रश्लोकविशिष्टं, भागद्वयात्मकं च वर्त्तते (ना.पु. ९५/१-२$^{१/२}$)। परन्तु स्वयं वायुपुराणम् आत्मानं द्वादशसाहस्रं चतुष्पादं च कथयति -

एवं द्वादशसाहस्रं पुराणं कवयो विदुः ।

यथा वेदश्चतुष्पादश्चतुष्पादं यथा युगम् ।। वा.पु. ३२/६६

परन्तु साम्प्रतम् उपलभ्यमाने वायुपुराणे १०९९१ श्लोकाः विद्यन्ते । अतः वायुपुराणमिदं चतुर्षु पादेषु विभक्तमस्ति - १. प्रक्रियापादः, २. अनुषङ्गपादः, ३. उपोद्घातपादः, ४. उपसंहारपादश्चेति । प्रक्रियापादे षट् अध्यायाः १-६, उपोद्घातपादे ५८अध्यायाः ७-६४, अनुषङ्गपादे ३५ अध्यायाः ६५-९९, उपसंहारपादे च १३ अध्यायाः १००-११२ सन्ति ।

**वर्ण्यविषयाः** - प्रथमतः अनुक्रमणिकावर्णनानन्तरम् ऋषिणां प्रश्नः, पुराणकथानुक्रमः ऋषिभिः कृतस्य द्वादशवार्षिकसत्रस्य निरूपणं, व्याससंशयापनोदनं, प्रजापतिकृतसृष्टिप्रसङ्गे ब्रह्माण्डोत्पत्ति-प्रलयवर्णनं, वराहोत्पत्तिः, तत्कृतपृथिवीसन्निवेशः, आश्रमविभागः, मन्वन्तरप्रसङ्गः, योगनिरूपणं, शौचाचारप्रदर्शनश्चेति विषयाः प्रतिपादिताः सन्ति । तदनन्तरं २१-२२ अध्याययोः कल्पनिरूपणं, २४ अध्याये विष्णुकृतशिवस्तवः, ३० अध्याये सतीदेहत्यागप्रसङ्गे दक्षकृतशिवस्तवः, ३५-५० अध्यायेषु भूगोलवर्णनं च विद्यते । भूगोलवर्णनप्रसङ्गे नदी-समुद्र-लोक-द्वीप-वन-पर्वतादीनां विवरणं प्रदत्तम् । ६०-६१ अध्याययोः वेदशाखाविवरणं सुमहत्त्वपूर्णं वर्त्तते । ६२-६९अध्यायेषु कश्यपवंश-ऋषिवंशयोः वर्णनं, ८६-८७अध्याययोः स्वर-ताल-लयाऽलंकारविशिष्टस्य सङ्गीतशास्त्रस्य वर्णनं, ८८-८९अध्याययोः राजवंशवर्णनं चेति विषयाः समुपस्थापिताः । तत्र राजवंशवर्णनप्रसङ्गे राज्ञः दीर्घतपसः पुत्ररूपेण धन्वन्तरेः अवतारविषयोपस्थापनकाले सूतेन काशीराजवंशपरंपराऽपि वर्णिता । तत् पश्चात् काशीक्षेत्रस्य अविमुक्तेति नामकरणहेतुः स्वयं भगवता शिवेन पार्वत्याः समक्षं प्रकाशितः (वा.पु. ९२/५७-५९) । अनन्तरं १०० अध्याये मन्वन्तराणां महत्त्वपूर्णं प्रतिपादनं कृतं वर्त्तते । तत्र अष्टममन्वन्तरात् आरभ्याऽन्तिममन्वन्तरं यावत् सर्वेषां मन्वादीनां नामनिर्देशपूर्वकं सविशेषवर्णनं कृतम् । तथा च भेदप्रदर्शनपूर्वकं प्रलयस्वरूपमपि प्रतिपादितम् । १०३ अध्याये सृष्टिवर्णनेन सह पुराणगुरुपरम्परा वर्णिता । १०४ अध्याये परमानन्दस्वरूपिणः लीलाविलासिनः नित्यगोलोकनिवासिनः श्रीराधासहितस्य

भगवतः श्रीकृष्णस्य माहात्म्यं प्रकाशितं वर्त्तते । ततश्च १०५–११२ अध्यायेषु गयाक्षेत्रमाहात्म्यप्रसङ्गे गयाक्षेत्रस्योत्पत्तिः शिलोत्पत्तिः गयायात्राविधिः, तत्र श्राद्धादिविधिः गयाक्षेत्रस्थतीर्थपरिचयश्चेति विषयाः वर्णिताः ।

एवं वायुपुराणे बहूनाम् उपयोगिविषयाणां विवेचनं हृदयग्राहिण्या शैल्या कृतमस्ति । यद्यपीदं शैवपुराणमस्ति तथाप्यत्र विष्णुमाहात्म्यं तदवतारचरितं च रुचिरशैल्या वर्णितत्वात् पुराणमिदं साम्प्रदायिकसंकीर्णतारहितं वर्त्तते । तथा च पुराणस्यास्य महत्त्वं सामाजिकदृष्ट्या, ऐतिहासिकदृष्ट्या, धार्मिकदृष्ट्या, भौगोलिकदृष्ट्या च सर्वजनानुमोदितम् वर्त्तते इति ।

**बोधप्रश्नाः**

१. वायुपुराणस्य उपसंहारपादे कति अध्यायाः सन्ति ?

२. अधुना उपलभ्यमाने वायुपुराणे कियन्तः श्लोकाः प्राप्यन्ते ?

**कालादिविवेचनम्** – वायुपुराणं षष्ठ–सप्तमशतकयोः समाजे लोकप्रियम् आसीदिति शङ्कराचार्यकृत – ब्रह्मसूत्रभाष्यात्, वाणभट्टकृतग्रन्थद्वयात् च ज्ञायते । शङ्कराचार्यः यद्यपि कस्यचित् पुराणस्य नामनिर्देशं नैवकृतवान् तथापि स स्मृतिवचनरूपेण पुराणवचनमेव उद्धृतवान् । ब्रह्मसूत्रे १/३/२८ सूत्रस्य शाङ्करभाष्ये 'नामरूपे च भूतानाम्' इति श्लोकः समुद्धृतोऽस्ति । श्लोकोऽयं वायुपुराणे ९/६३ प्राप्यते । तथा च ब्रह्मसूत्रे १/३/३० सूत्रस्य शाङ्करभाष्ये श्लोकद्वयं समुद्धृतं स्मृतिवचनरूपेण । तच्च श्लोकद्वयं वायुपुराणस्य ८/३२–३३ श्लोकरूपेण प्राप्यते । एतच्च श्लोकद्वयं वायुपुराणस्य ९/५७–५८ श्लोकत्वेन पुनः दृश्यते । अस्य ब्रह्मसूत्र शाङ्करभाष्यस्यान्तेऽपि पुनः श्लोकत्रयं समुद्धृतं, यस्मिन् प्रथमश्लोकद्वयं वायुपुराणे ९/६४–६५ श्लोकत्वेन समुपलभ्यते । यद्यपि शङ्कराचार्यः समुद्धृतश्लोकानां स्थाननिर्देशं नैव कृतवान् तथापि तत्समये वायुपुराणस्य अतीव लोकप्रियत्वात् ते श्लोकाः वायुपुराणस्यैव इति निश्चीयते । यतो हि शङ्कराचार्यात् पूर्वमपि षष्ठशतके प्रख्यातगद्यकाव्यकारः वाणभट्टः कादम्बर्याः पूर्वभागे जाबालेः आश्रमवर्णनप्रसङ्गे 'पुराणे वायुप्रलपितम्' इति वाक्यस्य प्रयोगं कृतवान् । अस्मात् प्रयोगात् ज्ञायते यत् तस्मिन् काले वायुपुराणं समाजे अति लोकप्रियम्

आसीत् इति । अतः शङ्कराचार्य-वाणभट्टयोः पूर्वतरत्वात् वायुपुराणस्य कालः षष्ठशतकात् पूर्वं स्यात् ।

वायुपुराणं गुप्तसाम्राज्यस्य प्रारम्भिकसीमोल्लेखं करोति । अत्र या सीमा उल्लिखिता सा समुद्रगुप्तस्य दिग्विजयात् पूर्वकालीनाऽसीत् । अतः समुद्रगुप्तात् पूर्वं चतुर्थशतकमेव वायुपुराणस्य रचनाकालः स्यात् ।

वायुपुराणे पुराणपञ्चलक्षणानां सर्गप्रतिसर्गादीनां स्पष्टविवरणं प्रदत्तं वर्त्तते । राज्ञाम् ऋषीणां च विषये पुराणेऽस्मिन् प्राचीनश्लोकाः गाथाश्च स्थान स्थाने समुपलभ्यन्ते । पुराणञ्चेदं तान्त्रिकप्रभावरहितं साम्प्रदायिकप्रभावमुक्तं च वर्त्तते । वहुभिः निबन्धकारैः आचार्यैः पुराणस्यास्य श्लोकान् समुद्धृत्य स्वनिबन्धस्य महत्त्वं प्रदिपादितम् । अतः पुराणमिदं सुमहत्त्वपूर्णं सुप्राचीनं च मन्यते । तथापि प्रक्षेपांशस्य प्रवेशः अत्रापि आशंक्यते । पुराणस्य उपसंहारपादस्य १०३ अध्याये वायुपुराणावतरणस्य गुरुपरम्परायाश्च प्रकाशानन्तरं फलश्रुतेः उल्लेखं कृत्वा उपसंहारः विहितः । उपसंहारान्ते पुनः गयामाहात्म्यप्रकाशकाः अध्यायाः सन्ति । अस्मात् प्रतीयते यत् केनापि विदुषा एते १०४-११२ अध्यायाः परवर्त्तिनि काले संयोजिताः स्युः । यतो हि पुराणस्य आरम्भे पुराणानुक्रमणिकायां गयामाहात्म्यस्य उल्लेखः नास्ति । तथापि पुराणास्यास्य सुमहत्त्वं सर्वजनानुमोदितं वर्त्तते इति ।

**बोधप्रश्नाः**

१. शङ्कराचार्यः आत्मनः कस्मिन् ग्रन्थे वायुपुराणश्लोकान् उद्धृतवान् ?

२. वाणभट्टस्य कालः किं शतकम् ?

३. गुप्तसाम्राज्यस्य सीमोल्लेखात् वायुपुराणस्य कालः किमात्मकः अनुमितः ?

४. वायुपुराणस्य के अध्यायाः प्रक्षिप्ताः आशंक्यन्ते ?

**शिव–वायुपुराणयोः महापुराणत्वसमीक्षा** – चतुर्थपुराणरूपेण यानि लक्षणानि पुराणान्तरेषु नारदीयादिषु प्रदत्तानि सन्ति तानि यस्मिन् पुराणे शैवे वायव्ये वा सगंतानि स्युः तदेव महापुराणं स्यात् । अतः अधुना चतुर्थपुराणलक्षणानि कुत्र संगतानि स्युः तदेव विचारयामः । नारदीयपुराणानुसारं चतुर्थपुराणं रुद्रमहिमप्रतिपादकं चतुर्विंशतिसाहस्रं श्वेतकल्पप्रसङ्गे वायुनाप्रोक्तं पूर्वोत्तरभागाभ्यां च विभक्तं वर्त्तते । तत्र पूर्वभागे सर्गानाम् उल्लेखः गयासुरवधप्रसङ्गः, व्रत–दान–राजधर्म–भूगोलादीनां विवरणं च वर्त्तते । उत्तरभागे च नर्मदायाः वर्णनं शिवस्य श्रेष्ठत्वं च वर्णितमस्तीति ।

मत्स्यपुराणानुसारं चतुर्थपुराणे श्वेतकल्पप्रसङ्गेन वायुप्रोक्ताः शिवमहत्वप्रतिपादकाः चतुर्विंशतिसहस्रश्लोकाः सन्ति । रेवामाहात्म्यानुसारं चतुर्थे महापुराणे शिवमाहात्म्यप्रतिपादकाः चतुर्विंशतिसहस्रश्लोकाः सन्ति । भागद्वयात्मकस्य तस्य पूर्वभागे भगवतः सदाशिवस्य माहात्म्यं प्रदर्शितमस्ति । उत्तरभागे च नर्मदायाः माहात्म्यं वर्त्तते इति ।

अधुना विचारणीयं वर्त्तते यत् लक्षणानाम् एतेषां कस्मिन् पुराणे शैवे वायव्ये वा समन्वयः भवति । वास्तवतः लक्षणानाम् एतेषां समन्वयः शिवपुराणे नैव भवति; यतो हि चतुर्थपुराणं वायुना प्रोक्तमस्ति, किन्तु शिवपुराणं संपूर्णतया वायुप्रोक्तं नैवास्ति, केवलं वायवीयसंहिता वायुप्रोक्ताऽस्ति । अपि च वायवीयसंहितायां चतुःसहस्रश्लोकानां विद्यमानत्वात् सम्पूर्णचतुर्थपुराणं नैव स्यात्; यतो हि चतुर्थपुराणे चतुर्विंशतिसहस्रश्लोकाः स्युः । किंच शिवपुराणस्य वायवीयसंहितायाः पूर्वार्द्धे गयासुरवधप्रसङ्गः, उत्तरार्द्धेच नर्मदानदीमहिमा वर्त्तते । शिवपुराणे यद्यपि चतुर्विंशतिसहस्राणि श्लोकाः सन्ति तथापि तत्र पूर्वोत्तरभागद्वयं नास्ति अपि तु सप्तसंहिताः सन्ति । अतः चतुर्थपुराणस्य लक्षणसमन्वयः कथमपि शिवपुराणे न भवतीति हेतोः चतुर्थपुराणत्वेन तत् स्वीकर्तुं नैव शक्यते ।

यद्यपि वायुपुराणस्य वक्ताऽस्ति वायुदेवः, शिवस्य महिमा च तत्र वर्णितोऽस्ति तथापि साम्प्रतं समुपलभ्यमाने पुराणेऽस्मिन् भागद्वयं नास्ति, अपि तु सन्ति चत्वारः पादा एव । परन्तु प्राचीनेषु हस्तलेखेषु भागद्वयमस्ति । पूनास्थितात् अड्यारपुस्तकालयात् प्राप्तस्य हस्तलिखितवायुपुराणस्य पुष्पिकायां लिखितमस्ति– 'इति श्रीमहापुराणे वायुप्रोक्ते द्वादशसाहस्र्यां संहितायां ब्रह्माण्डावर्तं समाप्तम् । समाप्तश्च वायुपुराणपूर्वार्द्धम् । अतः परं रेवामाहात्म्यं भविष्यति ।' अस्मात् प्रमाणीभवति यत् वायुपुराणस्य भागद्वयमासीत् । डॉ. पुसालकरमहोदयस्य मतानुसारं प्राचीनवायुपुराणान्तर्गताः बह्वृचः लक्ष्मीसंहितादिसंहिताः कालक्रमेण पृथग्भूताः इतस्ततः विराजन्ते इति हेतोः वायुपुराणस्य

श्लोकसंख्यायां न्यूनता जाता । नारदीयपुराणानुसारं यद्यपि गयामाहात्म्यं पूर्वभागे स्यात् तथापि तदधुना अन्तिमभागे वर्तते । एवं वायुपुराणेऽपि यद्यपि चतुर्थपुराणस्य सर्वलक्षणसमन्वयो न भवति तथापि बहूनां समन्वयो भवति ।

अतः एतद् विषये अयमेव सिद्धान्तो यत् अधुना उपलभ्यमानयोः शैववायवीय-पुराणयोर्मध्ये वायव्यमेव चतुर्थं महापुराणं स्यात् इति ।

**बोधप्रश्नाः**

१. वायुपुराणं भागद्वयात्मकं द्वादशसाहस्रं चेति कुत्रत्यहस्तलेखात् ज्ञायते ?

२. नारदपुराणानुसारं वायुपुराणे कुत्र गयामाहात्म्यं स्यात् ?

३. चतुर्थमहापुराणत्वेन कस्य पुराणस्य ग्रहणं सिद्धान्तितम् ?

**५. (क) श्रीमद्भागवतम् -**

नारदीयपुराणानुसारं पुराणमिदं पञ्चमं पुराणमस्ति । परन्तु स्वयं श्रीमद्भागवतम् आत्मानम् अष्टादशं मनुते । यतो हि सप्तदशपुराणरचनान्तेऽपि असन्तुष्टमनसः व्यासदेवस्य मनःसन्तोषो जातः नारदोपदेशात् पुराणस्यास्य प्रणयनेन । पुराणमिदं पुराणविग्रहस्य भगवतो विष्णोः ऊरुद्वयं वर्त्तते । अस्मिन् पुराणे परीक्षिच्छुकसंवादमाध्यमेन मुख्यतः भगवतो गुण-लीला-यशोवर्णनार्थं द्वादशस्कन्धानां ३३५ अध्यायानाम् अष्टादशसहस्रश्लोकानाञ्च सन्निवेशः कृतोऽस्ति । तत्र प्रथमस्कन्धे १९, द्वितीये १०, तृतीये ३३, चतुर्थे ३१, पञ्चमे २६, षष्ठे १९, सप्तमे १५, अष्टमे २४, नवमे २४, दशमे ९०, एकादशे ३१, द्वादशे च १३ अध्यायाः सन्ति । द्वादशस्कन्धात्मकं श्रीमद्भागवतमिदं साक्षाद्भगवतः श्रीकृष्णस्य वाङ्मयी मूर्त्तिरस्तीति पद्मपुराणस्य मतम् । अत्रस्थिताः द्वादशस्कन्धा एव श्रीकृष्णस्य द्वादशावयवाः सन्ति -

पादौ यदीयौ प्रथमद्वितीयौ तृतीयतुर्यौ कथितौ यदूरू ।
नाभिस्तथा पञ्चम एव षष्ठो भुजान्तरं दोर्युगलं तथान्यौ ।।
कण्ठस्तु राजन् नवमो यदीयो मुखारविन्दं दशमः प्रफुल्लम् ।

एकादशो यस्य ललाटपट्टं शिरोऽपि तु द्वादश एव भाति ।।
तमादिदेवं करुणानिधानं तमालवर्णं सुहितावतारम् ।
अपारसंसारसमुद्रसेतुं भजामहे भागवतस्वरूपम् ।।

**वर्ण्यविषयाः** - श्रीमद्भागवतस्यास्य द्वादशस्कन्धेषु भगवतः तद्भक्तानां च गुणलीलादिवर्णन-माध्यमेन सर्वविद्यानां सर्वदर्शनानाञ्च गूढतत्त्वानि स्फुटीकृतानि । तत्रादौ प्रथमस्कन्धे सूतशौनकसंवादप्रसङ्गे व्यासनारदप्रश्नोत्तरं, पाण्डवचरित्रं, शृङ्गिद्वारा परीक्षिते ब्रह्मशापः, राज्यत्यागपूर्वकं परीक्षितः गङ्गातीरे प्रायोपवेशनं, तत्र शुकागमनं, परीक्षित्कृतप्रश्नश्चेति विषयाः वर्णिताः । द्वितीयस्कन्धे शुकस्योत्तरप्रदानं, सद्योमुक्तिमार्गवर्णनं, ब्रह्मनारदसंवादे चतुः श्लोकिभागवतोपदेशः, पुराणलक्षणनिर्देशश्चास्ति । तृतीये विदुरोद्धवसंवादः, विदुरमैत्रेयवातालापः, सर्गभेदनिरूपणं, ब्रह्माण्डोत्पतिः, कालस्वरूपं, ब्रह्मणः प्रादुर्भावः, वराहकृत-पृथिव्युद्धारः, हिरण्याक्षवधः, मनुशतरूपोत्पत्तिः, कर्दमदेवहूतिविवाहः, कपिलावतारः, कपिलेन मात्रे सांख्यतत्त्व-भक्तितत्त्वोपदेशश्च वर्णितोऽस्ति । चतुर्थे सतीचरितं, दक्षयज्ञविध्वंसः, ध्रुव-वेन-पृथुचरितं, पुरञ्जनोपाख्यानञ्च वर्णितम् । पञ्चमे प्रियव्रतोपाख्यानं, नाभि-ऋषभचरितं, भरत-रहूगणसंवादमाध्यमेन भवाटवीवर्णनं, भूगोल-खगोल-नरकवर्णनं च विद्यते । षष्ठे अजामिलोपाख्यानं, दक्षकृतसृष्टिवर्णनं, वृत्रासुरवधः, चित्रकेतूपाख्यानं, मरुदुत्पत्तिश्चेति विषयाः वर्णिताः । सप्तमे नारदयुधिष्ठिरसंवादद्वारा प्रह्लादचरित्र-वर्णाश्रमधर्मनिरूपणम्, नारदपूर्वजन्मनो वर्णनञ्च वर्त्तते । अष्टमे चतुर्दशमन्वन्तरवर्णनं, गजेन्द्रमोक्षः, समुद्रमन्थनं, बलिवामनयोः चरित्रं, मत्स्यावतारकथा च वर्णितास्ति । नवमे सोम-सूर्यवंशवर्णनं, सुद्युम्नचरितं, सुकन्याचरितम्, अम्बरीषोपाख्यानम्, इक्ष्वाकुवंशवर्णनं, ककुत्स्थ-खट्वाङ्ग-मान्धातृ-सौभरि-त्रिशङ्कु-हरिश्चन्द्र-सगर-भगीरथ-रामादीनां चरित्रचित्रणम्, निमिवंशवर्णनम्, परशुरामचरितं, चन्द्रवंशे नहुष-ययाति-यदुवंशवर्णनं विद्यते । दशमे श्रीकृष्णचरितप्रसङ्गे तज्जन्म, पूतनादिवधः, कालियदमनं, चीरहरणं, गोवर्द्धनधारणम्, इन्द्रदर्पनाशः, रासलीला, कृष्णबलरामयोः मथुरामगमनं, कंसादिवधः, जरासन्धयुद्धं, कालयवनवधः, द्वारकानिर्माणं, रुक्मिणीहरणं, स्यमन्तकोपाख्यानं, वाणासुरयुद्धं, भौमासुरवधः, सुदामचरितं, वेदस्तुतिवर्णनं च विद्यते। एकादशे यदुकुलशापः, यदुकुलक्षयः, निमि-नवयोगीन्द्रप्रश्नोत्तरे भागवतधर्मनिरूपणं, श्रीकृष्णोद्धवसंवादे अध्यात्मविद्यायाः वर्णनं, सशरीरं भगवतः श्रीकृष्णस्य स्वधामगमनवर्णनं च वर्त्तते । द्वादशे च स्कन्धे कलियुगीयानां

राज्ञां वंशवर्णनं, युगधर्मविवेचनं, कल्क्यवतारः, प्रलयवर्णनं, परीक्षिन्मोक्षः, वेदशाखाविभाजनं, मार्कण्डेयमुनिचरितं, सूर्यव्यूह-पुराणसंख्यावर्णनं च विद्यते ।

श्रीमद्भागवते सर्गादिदशविषयाः प्रतिपादिताः सन्ति । तत्र प्रथमद्वितीयस्कन्धौ भूमिकात्वेन समाविष्टौ । ततः परं तृतीयस्कन्धे सर्गः, चतुर्थे विसर्गः अर्थात् ब्रह्मकृतः पृथिव्यादि-विशेषसर्गः, पञ्चमे स्थानम् अर्थात् भूर्लोकादिब्रह्माण्डस्थितिः, षष्ठे पोषणम् अर्थात् भगवतः अनुग्रहः, सप्तमे ऊतयः अर्थात् कर्मवासनाः, अष्टमे मन्वन्तरं, नवमे ईशानुकथा अर्थात् ईश्वरस्यावतारणां स्वभक्तानाञ्च कथा, दशमे निरोधः अर्थात् दुष्टनृपादीनां विनाशः, एकादशे मुक्तेः, द्वादशे च आश्रयः अर्थात् सर्वाश्रयः परमेश्वरः प्रतिपाद्यते । एवं भागवतस्य वर्ण्यविषयः भगवतः श्रीकृष्णस्य तद्भक्तानां च चरितेन सह ओतःप्रोतः वर्त्तते ।

एतेषु द्वादशस्कन्धेषु सर्वाणि निगूढतत्त्वानि साररूपेण प्रकाशितानि सन्ति । तेषु तत्त्वेषु मुख्ये भवतः साध्य-साधनतत्त्वे; यतो हि एतयोः ज्ञानेन जीवः साधनमाध्यमेन साध्यतत्त्वं साक्षात्कृत्य अमृतत्त्वं भजति । साध्यतत्त्वं प्रतिपादयितुं श्रीमद्भागवतम् अद्वैततत्त्वमेव प्रकाशयति । स्वयं भगवान् ब्रह्मणः समक्षं स्वतत्त्वविषये एवम् उपदिशति -

अहमेवासमेवाग्रे नान्यद् यत् सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।। श्री. भा. २/९/३२

श्लोकेऽस्मिन् सृष्टेः पूर्वं केवलस्य भगवतः सत्ता, नान्यस्य कस्यचित् कार्यात्मकस्थूलभावस्य कारणात्मकसूक्ष्मभावस्य च सत्ता आसीत् । स्थूलसूक्ष्मयोः कारणं प्रधानमपि भगवति लीनम् आसीत् । सृष्टेः अनन्तरं यत् स्थूलब्रह्माण्डं जातं तदपि स भगवान एव, प्रलयान्ते च यद् अवशिष्टं स्यात् तदपि स एवेति साध्यस्य अर्थात् साधनैः प्राप्तव्यस्य भगवतः तत्त्वं प्रकाशितम् । एवं साध्यतत्त्वं स भगवान् निर्गुणः, सगुणः जीवजगत्स्वरूपत्वात् सर्वरूपोऽस्ति । तत् एकमेव तत्त्वं ज्ञानिभिः ब्रह्म, योगिभिः परमात्मा, भक्तैश्च भगवान् इति कथ्यते (तत्रैव १/२/११) । सगुणरूपेण स भगवान् जगतः सृष्टि-स्थितिलयान् कर्तुं ब्रह्म-विष्णु-रुद्र संज्ञाः धारयति । स च त्रिगुणसाम्यावस्थास्वरूपां मायां सृष्ट्यर्थं प्रेरयति । तदा स पुरुष इति कथ्यते । अयं च पुरुषः परमेश्वरस्य आद्यः अवतारः कथ्यते । ब्रह्मादयश्च गुणावताराः निगद्यन्ते । एवं जगत्पालनार्थं मत्स्यकूर्मादिबहवः अवताराः साध्यतत्त्वे अन्तर्भूताः सन्ति । अस्य साध्यतत्त्वस्य परमेश्वरस्य प्राप्तिः तत्कृपया साधनैश्च स्यात् ।

तदेव साधनतत्त्वम् अधिकारिभेदेन कर्म-ज्ञान-योगश्चेति भेदयुक्तं वर्त्तते । तथापि एतेषु त्रिविधसाधनेषु भक्तिरेव मुख्यसाधनरूपेण भागवतेऽस्मिन् विस्तरेण प्रतिपादितम् । एतदर्थं स्वयं भगवान् श्रीकृष्णः भक्तेः सर्वश्रेष्ठत्वं प्रतिपादयति -

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्यागो यथा भक्तिर्ममोर्जिता ।। तत्रैव ११/१४/२०

कर्मज्ञानयोगाः भक्तेः साहचर्यं विना भगवत्प्राप्तये नैव समर्थाः स्युः; भक्तिद्वारेणैव समर्थाः भवेयुः । यदि भगवति भक्तिः भवति तदा स्वत एव ज्ञानं वैराग्यं च भवतः, ततश्च भगवत्स्वरूपज्ञानपूर्वकं संसारविरक्तिः भगवति अनुरक्तिः तत्प्राप्तिश्च भवति । अतः भक्तस्य कृते भक्तिं विना नान्यत् किञ्चित् साधनान्तरं वर्त्तते । अतः भक्तिरेव भगवत्प्राप्तये एकमेव साधनमस्ति । इयं च भक्तिः साध्य-साधनभेदेन द्विविधा । श्रवणकीर्त्तनादीनि साधनभक्तिः, साधनैश्च प्राप्तव्या या प्रीतिरूपा भक्तिः सा साध्या कथ्यते । तां प्रीतिरूपां साध्यभक्तिं प्राप्य भक्तः मोक्षमपि न वाञ्छति । एवंविधेषु भक्तेषु व्रजगोपिकाः सर्वश्रेष्ठाः । तासां प्रेम्णः पराकाष्ठा भागवतस्य रासपञ्चाध्याय्यां स्पष्टतया प्रदर्शिताऽस्ति । एवं श्रीमद्भगावते भक्तेः रसमयस्रोतः भक्तजनानां हृदयं प्लावयति ।

श्रीमद्भागवतेऽस्मिन् तत्त्वान्तराणां दर्शनान्तराणां च सरलया भाषया शैल्या च प्रतिपादनं कृतं वर्त्तते । दर्शनेषु सांख्यवेदान्तयोः प्राधान्यं पुराणेऽस्मिन् परिलक्ष्यते । योगतत्त्वस्य विचारः भागवतस्य बहुषु स्थानेष्वपि कृतः । द्वितीयस्कन्धे शुकदेवः भगवतः विराड्रूपस्य धारणा योगिभिः यथा कर्त्तव्या तद्विचारिता । धारणाबलेन जीवः क्रममुक्तिं सद्योमुक्तिं वा प्राप्तुं शक्नोति । एकादशस्कन्धे यम-नियमयोः प्रतिपादनमपि भगवान् श्रीकृष्णः कृतवान् । एवं योगसाधनेषु चरमावस्थास्वरूपस्य समाधेः प्रतिपादनं भगवता एकादशस्कन्धे स्पष्टतया कृतम् । वेदान्ततत्त्वमपि श्रीमद्भागवते आमूलचूलं प्रतिपादितमस्ति । तत्र आत्मतत्त्वस्य नित्यत्वं, परमात्मनः जगदाश्रयत्वं, सर्वव्यापकत्वं, सच्चिदानन्दस्वरूपत्वं, संसारस्य अनित्यत्वं, शरीरस्य क्षणभङ्गुरत्वं, स्वर्गादिलोकानां नाशशीलत्वं, भगवत्प्राप्तेः परमपुरुषार्थत्वं चेति अध्यात्मतत्त्वानि विचारितानि । एवं सर्वविधविद्यादीनां समावेशात् श्रीमद्भागवतस्य वर्ण्यविषयाः व्यापकाः उपयोगिनश्च सन्तीति ।

**बोधप्रश्नाः**

१. श्रीमद्भागवते कियन्तः अध्यायाः सन्ति ?

२. श्रीमद्भागवते साध्यतत्त्वं किम् ?

३. भगवत्प्राप्तये मुख्यसाधनं किम् ?

४. भागवतस्य कस्मिन् स्कन्धे पोषणम् इति लक्षणस्य प्रतिपादनं कृतम् ?

**स्थानकालादिविवेचनम्** – श्रीमद्भागवतस्य रचनास्थानविषये बहुमतभेदाः दृश्यन्ते । भागवते दक्षिणभारतीय-भौगोलिकस्थानानां वर्णनम् उत्तरभारतीयस्थानापेक्षया अधिकतया कृतम् । एकादशस्कन्धे (५/३८-४०) द्रविडदेशीयानां पयस्विनी-कृतमाला-ताम्रपर्णी-कावेरी-महानदीति नदीनां नामोल्लेखपूर्वकं कथितं यत् कलौ नारायणपरायणजनाः कुत्रचित् कुत्रचित् अवश्यं भविष्यन्ति परन्तु द्रविडेषु भूरिशः अर्थात् बहुलतया भविष्यन्ति । जनाश्च पूर्वोक्तानां पुण्यनदीनां जलपानेन वासुदेवपरायणा भविष्यन्तीति । किञ्च चतुर्थस्कन्धे पुरंजनः परस्मिन् जन्मनि विदर्भनरेशस्य कन्या भूत्वा पाण्ड्यनरेश-मलयध्वजं विवाहितवान् । तत्सकाशात् जाताः सप्तपुत्राः द्रविडनरेशाः अभवन् । भगवतः ऋषभदेवस्याऽपि अन्तिमजीवनं कर्णाटकक्षेत्रे व्यतीतमासीत् । तस्य पुत्रेषु एकतमस्य नाम यत् द्रुमिल इति आसीत् तदेव द्रविड इति नाम्नः प्राचीनरूपमासीत् । द्रविडदेशस्य राजा सत्यव्रतः कृतमालायां यदा स्नानरतः आसीत् तदा तस्य अञ्जल्यां मत्स्यस्याऽविर्भावोऽभूत् । बलरामस्य तीर्थयात्राप्रसङ्गे दक्षिणभारतीयतीर्थानां विशेषोल्लेखः प्राप्यते । एतेभ्यः प्रमाणेभ्यः प्रमाण्यते यत् भागवतकारः दक्षिणभारतेन सह विशेषतः तमिलप्रान्तेन सह परिचितः आसीत् । अतः पुराणस्यास्य रचना तत्प्रान्ते स्यादिति अनुमीयते ।

पुराणस्यास्य कालोऽपि एवम् अनुमातुं शक्यते । हेमाद्रिः स्वरचित- 'चतुर्वर्गचिन्तामणि'ग्रन्थस्य व्रतखण्डे श्रीमद्भागवतस्य 'स्त्रीशूद्रद्विजबन्धूनाम्' इति श्लोकं समुद्धृत्य भागवतस्य तत्पूर्ववर्तित्वं प्रमाणितवान् । अयं हेमाद्रिः यादवनरेश-महादेव-रामचन्द्रयोः समकालीनः आसीत् । तयोश्च समयः

त्रयोदशशतकम् । अतः भागवतस्य समयः एकादशशतकं स्यात् । द्वैतमतसंस्थापकः मध्वाचार्यः श्रीमद्भागवतोपरि 'भागवततात्पर्यनिर्णय' इति ग्रन्थं विरचितवान् । अतः अस्य स्थितिकालात् द्वादशशतकात् पूर्वमेव भागवतस्य कालः दशमशतकं एकादशतकं वा स्यात् । रामानुजोऽपि वेदान्ततत्त्वसारग्रन्थे भागवतस्य वेदस्तुतेः एकादशस्कन्धस्य च कतिपयश्लोकान् उद्धृत्य भागवतं तत् पूर्ववर्त्तीति प्रमाणितवान् । अतः रामानुजकालात् एकादशशतकात् पूर्वमेव नवमदशमशतकयोः भागवतम् रचितमिति अनुमीयते । शङ्कराचार्यस्य परमगुरुः गौडपादाचार्यः स्वकीये पञ्चीकरणव्याख्यानग्रन्थे भागवतस्य 'जगृहे पौरुषं रूपम्' (भा. १/३/१) इति श्लोकं समुद्धृतवान् । उत्तरगीतायाञ्च स श्रीमद्भागवतस्य नामनिर्देशपूर्वकं 'श्रेयःस्रुतिं भक्तिमुदस्य ते विभो' इति दशमस्कन्धीयश्लोकम् उद्धृतवान् । गौडपादस्य कालः सप्तमशतकस्य आदिभागः स्यात् । अतः भागवतस्य कालोऽपि षष्ठशतकात् परं नैव स्यादिति ।

**बोधप्रश्नाः**

१. श्रीमद्भागवस्य रचना कस्मिन् देशे स्यात् ?

२. चतुर्वर्गचिन्तामणि ग्रन्थाधारेण भागवतस्य कालः कः स्यात् ?

३. गौडपादाचार्यकृतग्रन्थाश्रयेण भागवतस्य कः कालः अनुमीयते ?

### ५. (ख) देवीभागवतम् –

श्रीमद्भागवतमिव देवीभागवतमपि द्वादशस्कन्धयुक्तम् अष्टादशसहस्रश्लोकविशिष्टञ्च वर्त्तते । पुराणस्यास्य वक्ताऽस्ति वेदव्यासः श्रोता च परीक्षित्पुत्रः जनमेजयः ।

**वर्ण्यविषयाः** – पुराणस्यास्य मुख्यविषयोऽस्ति देवीतत्त्वम् । देवी एव परमं तत्त्वम् अस्ति । इयं देवी नित्या, निर्गुणा, सर्वव्यापिनी, कल्याणमयी, योगगम्या, जाग्रत्स्वप्नसुषुप्तिभिन्न–तुरीयाऽवस्थास्थिता च वर्त्तते । जगत्सृष्टिस्थितिलयार्थं सा त्रिगुणानुसारं त्रिविधशक्तिस्वरूपं धारयति । सत्त्वगुणमयी शक्तिः लक्ष्मीः, रजोगुणमयी सरस्वती, तमोगुणमयी च काली अस्ति । सृष्ट्यादिसंपादनार्थं एताः शक्तयः ब्रह्मविष्णुरुद्रैः सह सम्मिलिताः भवन्ति ।

देवी मूलप्रकृतिरूपाऽस्ति । मूलप्रकृतिरूपायाः तस्याः विविधानि रूपाणि पुराणेऽस्मिन् प्रकाशितानि सन्ति । तेषु विविधेषु रूपेषु पञ्चप्रकृतिरूपाणि मुख्यानि । पञ्चप्रकृतयः सन्ति दुर्गा-राधा-लक्ष्मी-सरस्वती-सावित्र्यः । एतासां मुख्यत्वं नवमस्कन्धे प्रतिपादितमस्ति -

गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चधा स्मृता ।।

एतासु पञ्चप्रकृतिषु दुर्गाऽस्ति सर्वशक्तिस्वरूपा, लक्ष्मीः सर्वसम्पत्स्वरूपा, सरस्वती सर्वसंवित् (ज्ञान) स्वरूपा, सावित्री शुद्धसत्त्वस्वरूपा, राधा च परमानन्दस्वरूपा विद्यते । एताः यद्यपि स्वयं संपूर्णाः सन्ति तथापि एतासु राधाऽस्ति मूलस्थानीया, परमाह्लादरूपा, सन्तोषहर्षरूपिणी, निर्गुणा, निराकारा, निर्लिप्ता, साक्षात्परमात्मस्वरूपिणी च ।

देव्याः माहात्म्य-स्वरूपादिसूचकानि बहुचरित्राणि पुराणेऽस्मिन् कीर्तितानि सन्ति । तेषु पञ्चप्रसङ्गाः मुख्यत्वेन परिदृश्यन्ते - मधुकैटभवधः, महिषासुरवधः, चण्डमुण्डवधः, धूम्रलोचनवधः, शुम्भनिशुम्भवधश्चेति । मधुकैटभवधः देवीभागवतस्य प्रथमस्कन्धेऽस्ति । अवशिष्टाः प्रसङ्गाः पञ्चमस्कन्धे समुपलभ्यन्ते । शक्तिस्वरूपा देवी एतेषां वधं कृत्वा जीवनशक्तिम् उज्जीवयति पुष्टीकरोति च । यतो हि मधुकैटभौ वृथाऽहारविहारयोः प्रतीकौ स्तः । तथा च महिषासुरः मोहस्य, शुम्भनिशुम्भौ अहंकार-विषयसुखयोः, धूम्रलोचनः आलस्यस्य, चण्डमुण्डौ रागद्वेषयोः, रक्तवीजश्च वासनायाः प्रतीको वर्त्तते । सच्चिदानन्दमय्याः देव्याः सत्तायाः अभिव्यक्तिः मधुकैटभवधे, चिन्मयतायाः अर्थात् ज्ञानमयतायाः अभिव्यक्तिः महिषासुरवधे, आनन्दमयतायाः अभिव्यक्तिः शुम्भनिशुम्भवधे च जाता ।

देवीभागवते देवीतत्त्वप्रतिपादनमाध्यमेन एकस्यैव तस्य परमतत्त्वस्य प्रतिपादनं जायते । एकस्यैव परतत्त्वस्य नामरूपभेदेन प्रतिपादनं क्रियते । अत्र देव्याः विविधनामभिः रूपैश्च यथा परतत्त्वस्य प्रकाशः भवति तथा पुराणान्तरेषु शास्त्रान्तरेषु च परमपुरुषस्य नामरूपभेदैः तस्यैव परमतत्त्वस्य प्रकाशः भवति । शक्तिरूपा देवी यथा निर्गुणा, निराकारा, सच्चिदानन्दमयी चास्ति तथा शक्तिमान् परमपुरुषो निर्गुणः निराकारः सच्चिदानन्दमयश्चास्ति । अतः वास्तवतः शक्ति-शक्तिमतोः न कश्चिद् भेदः अस्ति । एतदेव देवीभागवतं स्पष्टम् उद्घोषयति -

या शक्तिः परमात्मासौ योऽसौ सा परमा मता ।
अन्तरं नैतयोः कोऽपि सूक्ष्मं वेद च नारद ।। दे. भा. ३/७/१५

अतः शक्तिशक्तिमतोः अभेदात् वास्तवतः तद्द्वयमेव स्वरूपतः एकमेव परतत्त्वम् । परतत्त्वसाक्षात्कारार्थं साधकस्य या साधनावस्था तत्र शक्तिः साधनरूपेण प्रकाशते । परतत्त्वसाक्षात्कारे जाते च शक्तिमान् साध्यरूपेण प्रकाशते । तथा च सृष्ट्यादिकाले शक्तिः सृष्ट्यादिसामर्थ्यरूपेण, शक्तिमांश्च सृष्ट्यादिकर्तृरूपेण प्रकाशते । एवं शक्तिं विहाय शक्तिमतः, शक्तिमन्तं च विहाय शक्तेः सत्ता न स्यात् इति देवीभागवतं प्रतिपादयति –

सदैकत्वं न भेदोऽस्ति सर्वदैव ममास्य च ।
योऽसौ साऽहमहं योऽसौ भेदोऽस्ति मतिविभ्रमात् ।। दे.भा. ३/६/२

सर्वमिदं जगत् शक्ति–शक्तिमद्भ्यां व्याप्तम् । अतः शक्तिरूपस्य परतत्त्वस्य स्वरूपप्रकाशाय देवीभागवतं, शक्तिमत्स्वरूपस्य प्रकाशाय च श्रीमद्भागवतमेव व्यासदेवेन प्रणीतम् । एतत्पुराणद्वयं परस्परं अनुपूरकमस्तीति हेतोः न तयोर्मध्ये कश्चिद् भेदः मन्तव्यः ।

**बोधप्रश्नाः**

१. देवीभागवतस्य वक्ता कः ? श्रोता च कः ?

२. रजोगुणमयी शक्तिः किंनाम्नी ?

३. पञ्चप्रकृतयः काः ?

४. महिषासुरः कस्य प्रतीकः ?

**श्रीमद्भागवत–देवीभागवतयोः महापुराणत्वसमीक्षा** – यद्यपि एतयोः पुराणयोः मध्ये तत्त्वदृष्ट्या न कोऽपि भेदः वर्तते तथापि पुराणानां पञ्चमस्थाने एकमेव स्यात्, कथमपि तद्द्वयमेव एकस्मिन् पञ्चमस्थाने स्वीकर्त्तुं न शक्यते इति हेतोः तयोर्मध्ये कस्यचित् एकस्यैव महापुराणरूपेण ग्रहणं भवेत् । तदधुना विचार्यते यत् पुराणानां सात्त्विकादिभेदेन विभाजनं यत् पद्मपुराणे जातं तत्र सात्त्विकेषु भागवतस्य ग्रहणं भवति । पुनश्च सात्त्विकानामपि श्रेणीत्रयम् उत्तममध्यमाधमभेदेन गरुडपुराणे

प्रकाशितम् । तत्र उत्तमपुराणरूपेण भागवतस्य गणनं कृतम् । उत्तमपुराणस्य लक्षणं च कृतं यत् यस्मिन् पुराणे श्रीहरेः स्वरूप-चरित-माहात्म्यानां वर्णनम् अधिकतया कृतं तत् उत्तमसात्त्विकं कथ्यते । एतत्लक्षणानुसारं श्रीमद्भागवतमेव भागवतपदेन स्वीकर्तुं शक्यते नतु देवीभागवतम्; यतो हि तत्र विष्णोः नहि अपि तु देव्याः माहात्म्यादिकम् आधिक्येन वर्त्तते । अतः श्रीमद्भागवतमेव भागवतपदेन स्वीकृतत्वात् महापुराणमस्ति ।

अन्येषु मत्स्यादिपुराणेषु प्रकाशितानां भागवतलक्षणानां श्रीमद्भागवते समन्वयो भवति । भागवतस्य लक्षणत्रयं वर्त्तते - १. गायत्र्या समारम्भः, २. वृत्रासुरवधप्रसङ्गः, ३. हयग्रीवब्रह्मविद्याविवरणञ्चेति । श्रीमद्भागवतस्य 'जन्माद्यस्य' इति मङ्गलाचरणश्लोके गायत्र्याः अर्थः विभिन्नपदमाध्यमेन सम्पूर्णतया प्रकाशितोऽस्ति । तेषु पदेषु च धीमहि इति पदं गायत्रीमन्त्रे साक्षात् प्रयुक्तं वर्त्तते । एवं श्लोकोऽयं शब्दतः अर्थतश्च गायत्रीं प्रकाशयति । परन्तु देवीभागवतं गायत्र्याः साक्षात् पदानि व्यवहृत्य गायत्रीवत् त्रिपादविशिष्टेन पद्येन आरम्भं करोति । अतः 'यत्राधिकृत्यगायत्रीं' 'गायत्र्या च समारम्भः' 'गायत्रीभाष्यरूपोऽसौ' इति लक्षणसमन्वयः श्रीमद्भागवते एव भवति, न तु देवीभागवते । किञ्च गायत्रीप्रतिपाद्यदेवोऽस्ति विष्णुः 'ध्येयः सदा सवितृमण्डलमध्यवर्त्ती' इति सूर्यस्तवानुसारं, न तु देवी । अतः श्रीमद्भागवतमेव पञ्चमं महापुराणं स्यात् ।

हयग्रीवब्रह्मविद्याप्रसङ्गः श्रीमद्भागवते षष्ठस्कन्धस्य अष्टमाध्याये वर्त्तते । अत्र दधीचिमुनिना अश्विनीकुमारयोः प्रार्थनानुसारं ब्रह्मविद्यायाः उपदेशार्थं यदा स्वीकृतिः प्रदत्ता तदा इन्द्रः अश्विनीकुमारयोः वैद्यत्वात् ब्रह्मविद्यायां तयोः अधिकाराभावं दर्शयित्वा उपदेशकर्तुः शिरश्छेदः स्यादिति दधीचिं कथयामास । तच्छ्रुत्वा अश्विनीकुमारौ दधीचेः शिरश्छित्वा तत्स्थाने अश्वशिरः योजयामासतुः । अश्वशिरसा च दधीचिना ब्रह्मविद्योपदेशः कृतः । ततश्चेन्द्रः तच्छिरः छिन्नवान् । अश्वशिरसि छिन्ने सति मूलं शिरः अश्विनीकुमाराभ्यां पुनः योजितम् । अतः अश्वशिरःयुक्तेन दधीचिना उपदिष्टत्वात् नारायणकवचः 'हयग्रीवब्रह्मविद्या' इति कथ्यते । उपदेशोऽयं वृत्रासुरवधप्रसङ्गे प्रदत्तः आसीत् । एतदुपदेशेन शक्तिसम्पन्नः इन्द्रः वृत्रासुरं निहतवान् इति श्रीमद्भागवते वर्त्तते । परन्तु देवीभागवतं कथयति देव्याः प्रवेशात् शक्तिसंपन्नेन फेनेन वृत्रासुरो निहत इति । अत्र ब्रह्मविद्योपदेशप्रसङ्गः नास्ति । अतः हयग्रीवब्रह्मविद्योपदेशप्रसङ्गात् श्रीमद्भागवतस्य महापुराणत्वं सिद्ध्यति ।

वल्लालसेनः स्वकीय-दानसागरग्रन्थे भागवतस्य एकमपि श्लोकं नोद्धृतवान् यतोहि भागवते दानविषयकः नैकोऽपि श्लोकः वर्त्तते । परन्तु देवीभागवते तादृशश्लोकानां वाहुल्यात् वल्लालसेनस्य भागवतपदेन लक्ष्यं देवीभागवतं नैव स्यात् । अतः वल्लालसेनमते भागवतपदेन श्रीमद्भागवतमेव स्वीकृतत्वात् महापुराणमेवास्तीति ।

**बोधप्रश्नाः**

१. उत्तमसात्त्विकपुराणेषु श्रीमद्भागवतस्य ग्रहणे कः हेतुः ?

२. श्रीमद्भागवतस्य कस्मिन् श्लोके गायत्र्याः अर्थः प्रकाशितोऽस्ति ?

३. दानसागरग्रन्थे श्रीमद्भागवतश्लोकानाम् उद्धरणं कथं न प्रदत्तम् ?

**द्वितीयांशस्य सारः –**

अस्मिन् द्वितीयांशे अष्टादशपुराणेषु चतुर्थ-पञ्चमपुराणयोः परिचयः प्रस्तुतः । परन्तु चतुर्थपुराणत्वेन विकल्परूपेण द्वयोः शिवपुराण-वायुपुराणयोः ग्रहणं भवति । तथा च पञ्चपुराणरूपेण श्रीमद्भागवत-देवीभागवतयोः ग्रहणं भवति । अतः अस्मिन् द्वितीयांशे चतुर्णामेव पुराणानां परिचयः प्रस्तुतः । आदौ चतुर्थपुराणरूपेण शिवपुराणस्य परिचयप्रसङ्गे तत्स्वरूपम् अर्थात् श्लाकसंख्या-अध्यायसंख्या-संहिताद्यन्तर्विभाजनादिकं प्रकाशितम् । ततः तस्य वर्ण्यविषयाः, स्थानकालादयश्च विवेचिताः । तथा च वायुपुराणस्य स्वरूपं, वर्ण्यविषयाः, स्थानकालादयश्च विचारिताः । द्वयोः पुराणयोः परिचयान्ते चतुर्थपुराणरूपेण कस्य ग्रहणं स्यात् इति निश्चेतुम् द्वयोः महापुराणत्वसमीक्षा कृता । समीक्षान्ते सिद्धान्तितं यत् वायुपुराणमेव चतुर्थमहापुराणं स्यादिति ।

अतः परं पञ्चमपुराणस्य परिचयप्रसङ्गे प्रथमतः श्रीमद्भागवतस्य ततश्च देवीभागवतस्य स्वरूपादिकं प्रस्तुतम् । अन्ते द्वयोः पुराणयोः महापुराणत्वसमीक्षणं कृतम् । विभिन्नाभिः युक्तिभिः समीक्षणान्ते एतदेव निश्चयीकृतं यत् श्रीमद्भागवतमेव पञ्चमस्थानीयं महापुराणमिति ।

**पारिभाषिकशब्दकोषः** – तुरीयावस्था – जीवस्य जाग्रत्–स्वप्न–सुषुप्तयः तिस्रः अवस्थाः त्रिगुणकृताः एव । सत्त्वगुणात् जागरणं, रजोगुणात् स्वप्नः, तमोगुणाच्च सुषुप्तिः इति जीवस्य तिस्रः अवस्थाः । एताभ्यः तिसृभ्यः अवस्थाभ्यः परम् एका निर्गुणाऽवस्था वर्त्तते या तुरीया अर्थात् चतुर्थी अवस्था कथ्यते । इयं या अवस्था सा परमात्मनः स्वाभाविकी अवस्था इति हेतोः पूर्वोक्तासु तिसृषु जाग्रदाद्यवस्थासु सत्तारूपेण तिष्ठति । अतः परमेश्वरस्य परमेश्वर्याः वा स्वाभाविकी निर्गुणाऽवस्था एव तुरीयावस्था इति कथ्यते ।

**आदर्शप्रश्नाः**

**क) निबन्धात्मकप्रश्नाः** २०/१५

१. शिवपुराणस्य वर्ण्यविषयान् यथाधीतं प्रकाशयत ।

२. श्रीमद्भागवतस्य वर्ण्यविषयाः प्रकाश्यन्ताम् ।

३. श्रीमद्भागवत देवीभागवतयोः महापुराणत्वं विवेचयत ।

**ख) विश्लेषणात्मकप्रश्नाः** १२/१०

१. शिवपुराणस्य स्वरूपं रचनाकालञ्च प्रकाशयत ।

२. वायुपुराणस्य कालः समीक्ष्यताम् ।

३. श्रीमद्भागवतस्य स्वरूपं संप्रकाश्य स्थानकालौ विवेचयत ।

४. देवीभागवतस्य वर्ण्यविषयान् प्रकाशयत ।

**ग) लघूत्तरीयाः प्रश्नाः** ५

१. शिवपुराणस्य सप्तसंहिता द्वादशसंहिताश्च नामतो लिखित्वा सप्तसंहितानां अध्यायसंख्यां लिखत ।

२. वायुपुराणस्य वर्ण्यविषयान् संक्षेपेण लिखत ।

३. अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ।। – इति श्लोकम् सप्रसङ्गं व्याख्यात ।

४. देवीभागवते प्रतिपादितं शक्तिशक्तिमतोः अभेदं प्रतिपादयत ।

**घ) एकाङ्कप्रश्नाः** १

१. शिवपुराणे कति अध्यायाः सन्ति ?

२. शिवपुराणस्य रुद्रसंहिता कियत्खण्डात्मिका ?

३. वायुपुराणे कियन्तः श्लोकाः सन्तीति स्वयं वायुपुराणं कथयति ?

४. गयाक्षेत्रमाहात्म्यं वायुपुराणस्य कस्मिन् पादे वर्त्तते ?

५. श्रीमद्भागवतम् आत्मानम् अष्टादशपुराणं कथं मनुते ?

६. हयग्रीवब्रह्मविद्या भागवतस्य कस्मिन् स्कन्धे कस्मिन् प्रसङ्गे च वर्त्तते ?

७. गौडपादाचार्यः कः ? स च कस्मिन् ग्रन्थे 'श्रेयःसृतिम्' इति श्लोकं उद्धृतवान् ?

८. जनमेजयः कः ?

९. पञ्चप्रकृतिषु राधा किंस्वरूपा ?

१०. हयग्रीवब्रह्मविद्या इत्यत्र हयग्रीवपदेन कस्य निर्देशः कृतः ?

**उत्तराणि** – १. ४५७अध्यायाः, २. पञ्चखण्डात्मिका, ३. द्वादशसहस्राणि श्लोकाः, ४. उपसंहारपादे, ५. सप्तदशपुराणानां रचनान्ते व्यासदेवेन नारदोपदेशात् स्वमनः प्रसादाय रचितत्वात्, ६. षष्ठस्कन्धे वृत्रासुरबधप्रसङ्गे, ७. शङ्कराचार्यस्य परमगुरुः, उत्तरगीतायाम्, ८.परीक्षिन्महाराजस्य पुत्रः, ९. परमानन्दस्वरूपा, १०. अश्वमुखयुक्तस्य दधीचिमुनेः ।

❖❖❖

# तृतीयोंऽशः

## नारदीय–मार्कण्डेय–अग्नि–भविष्य–ब्रह्मवैवर्त्त–लिङ्गपुराणानि

**प्रस्तावना –** पूर्वस्मिन् अंशद्वये अस्माभिः अष्टादशपुराणेषु पञ्चमपुराणपर्यन्तं परिचयः संप्राप्तः । अधुना तृतीयांशेऽस्मिन् षष्ठात् एकादशं यावत् षट्पुराणानां परिचयः प्रस्तोष्यते । नारदीयपुराणम्, मार्कण्डेयपुराणम्, अग्निपुराणम्, भविष्यपुराणम्, ब्रह्मवैवर्त्तपुराणम्, लिङ्गपुराणं चेति षट्पुराणानां चर्चाऽत्र करिष्यते । परिचयप्रसङ्गे प्रत्येकं पुराणस्य श्लोकसंख्यादिस्वरूपं, वर्ण्यविषयाः, स्थानकालाऽनुमानं, वैशिष्ट्यं चेति विषयाः विवेचयिष्यन्ते । अतोऽधुना तेषां परिचयार्थं यत्नः क्रियते ।

**उद्देश्यम्** – अत्र पूर्वोक्तानां षट्पुराणानां परिचयः निम्नोक्तबिन्दून् आधारीकृत्य प्रस्तोष्यते । ते बिन्दवो यथा –

- नारदीयपुराणस्य स्वरूपादिविवेचनम्
- मार्कण्डेयपुराणस्य स्वरूपादिविवेचनम्
- अग्निपुराणस्य विवेचनम्
- भविष्यपुराणस्य विवेचनम्
- ब्रह्मवैवर्त्तस्य विवेचनम्
- लिङ्गपुराणस्य स्वरूपादिविवेचनम् च ।

**६. नारदीयपुराणम् –**

नारदीयपुराणं मत्स्यपुराणमते पञ्चविंशतिसहस्रश्लोकात्मकम् अस्ति । अष्टादशपुराणेषु पुराणमिदं षष्ठं वर्त्तते । नारदीयपुराणमिदं बृहत्कल्पप्रसङ्गे देवर्षिनारदेन कथितमिति मात्स्यमतम् । एतत् यद्यपि पञ्चविंशतिसहस्रश्लोकात्मकं तथापि साम्प्रतं समुपलभ्यमानेऽस्मिन् पुराणे केवलं द्वाविंशतिसहस्रश्लोकाः लभ्यन्ते । त्रिसहस्रश्लोकैः न्यूनत्वात् पुराणमिदम् अपूर्णम् उच्यते । अस्मिन् पुराणे पूर्वखण्डम् उत्तरखण्डं चेति खण्डद्वयं वर्त्तते । पूर्वखण्डे चत्वारः पादाः १२५ अध्यायाश्च सन्ति । उत्तरखण्डे च ८२ अध्यायाः, संकलनेन २०७ अध्यायाः सन्ति । पुराणमिदं वैष्णवपुराणमस्ति यतो हि अत्र वैष्णवसिद्धान्ताः दीक्षादिविधयश्च प्रतिपादिताः सन्ति । अत्र च वैष्णवागमस्य विमर्शेन

सह पाञ्चरात्रानुष्ठानस्य संकेतः वर्त्तते । अतः पुराणमिदं वैष्णवधर्मस्य प्रतिपादकत्वात् विशिष्टवैष्णवपुराणत्वेन स्वीक्रियते ।

**वर्ण्यविषयाः** – पुराणस्यास्य पूर्वखण्डे चतुर्णां वर्णानाम् आश्रमाणाञ्च आचारविचारश्राद्ध-प्रायश्चित्तादीनां प्रतिपादनं कृतं विद्यते । तत्र एकस्मिन् अध्याये व्याकरण-निरुक्त-छन्दःशास्त्राणामपि विचारः समुपस्थापितः । राम-कृष्ण-शिव-हनुमत्-कालीप्रभृतीनां मन्त्रादिनिर्देशोऽपि तत्र कृतोऽस्ति । विष्णुभक्तिरेव अमृतत्वप्राप्तेः मुख्यसाधनमिति पूर्वखण्डेऽस्मिन् प्रकाशितम् । विष्णुभक्ता एव परमसाधकाः सन्तीति स्वीकृतमस्ति । पुराणस्य उत्तरखण्डे च विख्यातभक्तस्य रुक्माङ्गदस्य चरित्रम् अतिसुन्दरं चित्रितमस्ति ।

नारदीयपुराणमिदम् अष्टादशपुराणानां विषयानुक्रमणिकां स्पष्टतया प्रस्तौति । कस्मिन् पुराणे के केंऽशाः वर्त्तन्ते, तदज्ञानं विषयानुक्रमणिकातः प्राप्यते । अतः तद्विषयानुक्रमणिकाऽधारेण कस्मिन् पुराणे कः अंशः परवर्त्तिकाले पक्षिप्ततया संयोजितः तद्ज्ञायते । अतः ऐतिहासिकसमीक्षणार्थं पुराणमिदं सुमहत्त्वपूर्णमस्ति ।

पुराणमिदम् अग्निपुराण-गरुडपुराणवत् एव समस्तविद्याप्रतिपादकं पुराणम् अस्ति । अत्र यद्यपि सर्वाणि दर्शनानि, शास्त्राणि धर्माश्च विवेचिताः तथापि वैष्णवधर्मस्य विशिष्टप्रतिपादनम् अत्र कृतम् । अस्य उत्तरभागे एकादशीव्रतानुष्ठानं वर्णितम् । एकादशीव्रतमाहात्म्यम् अनुभूय परमवैष्णवः राजा रुक्माङ्गदः स्वराज्ये ८-८०वर्षवयस्कस्य कृते एकादशीव्रतपालनम् अवश्यकरणीयम्, आदेशस्य उल्लंघने जनः वध्यः, दण्ड्यः, देशाद् वहिस्कार्यश्च स्यादिति आदेशः प्रचारितः -

> अष्टवर्षाधिको मर्त्यः अशीतिनाह पूर्यते ।
> यो भुङ्क्ते मामके राष्ट्रे विष्णोरहनि पापकृत् ।।
> स मे वध्यश्च दण्ड्यश्च निवास्यो विषयाद् वहिः । ना. पु. २३/४१

पुराणेऽस्मिन् बौद्धानां महती निन्दा कृतास्ति । बौद्धमन्दिरेषु ये ब्राह्मणाः प्रविशन्ति तेषां प्रायश्चित्तेनाऽपि शुद्धिः न भवति; यतो हि बौद्धानां वेदनिन्दकत्वात् पाषण्डित्वं प्रतिपादितम् (१५/५०)।

**कालादिविवेचनम्** – बौद्धानां निन्दा पुराणेऽस्मिन् कृता-इत्यस्मात् पुराणमिदं सप्तमशताब्द्यां

तत्परस्मिन्काले वा रचितमिति ज्ञायते; यतो हि सप्तम्यां शताब्द्यां समाजे बौद्धान् प्रति विरोधभावः जागृतः आसीत् । तदा च समाजस्य धार्मिकवातावरणं विशोधयितुं कुमारिलभट्टः दार्शनिकयुक्तिभिः बौद्धानां प्रबलखण्डनं कृतवान् । किञ्च षष्ठशताब्द्यां विद्यमानस्य महाकविभारवेः किरातार्जुनीयकाव्यस्य एकेन श्लोकेन सह नारदीयपुराणस्य एकः श्लोकः शब्दतः अर्थतश्च समानः प्राप्यते –

अविवेको हि सर्वेषामापदां परमं पदम् । ना. पु. १/९/५०

अविवेकः परमापदां पदम् ।। किरातार्जुनीय २/३०

अतः भारवेः श्लोकानुकरणात् नारदीयपुराणं तत्परवर्त्ति स्यात् । एवं समालोचकानां मतं यत् पुराणमिदं सप्तम–नवमशतकमध्ये रचितमिति ।

प्रो. विलसनः पुराणमिदं षोडशशताब्द्यां रचितं भक्तिग्रन्थमेकं मनुते । परन्तु एकादशशताब्द्यां वल्लालसेनेन स्वकीय–दानसागरग्रन्थे नारदीयपुराणश्लोकाः उद्धृता इति हेतोः विलसनस्य मतम् अमूलकं प्रतिभाति । किञ्च पुराणेऽस्मिन् पुराणलक्षणानां सुष्ठुसमन्वयात् नेदं भक्तिग्रन्थः अपितु वैष्णवपुराणमस्ति । अतः विलसनस्य मतम् उभयथा अप्रामाणिकम् इति ।

**बोधप्रश्नाः**

१. कस्य कल्पस्य प्रसङ्गे नारदीयपुराणं प्रकाशितम् ?

२. पुराणस्य उत्तरखण्डे किं वर्णितम् ?

३. नारदपुराणे कति खण्डाः सन्ति ?

४. पुराणस्यास्य कः कालः अनुमीयते ?

**७. मार्कण्डेयपुराणम् –**

अष्टादशपुराणेषु पुराणमिदं सप्तमम् अस्ति । मत्स्यपुराणानुसारं पक्षिणः उद्दिश्य मुनिभिः प्रश्ने कृते सति मार्कण्डेयः धर्मार्थादीनां सविस्तरं प्रतिपादनं यत्र कृतवान्, यत्र च नवसहस्राणि श्लोकाः

सन्ति तदेव मार्कण्डेयपुराणं कथ्यते । नारदीयपुराणमते मार्कण्डेयपुराणं तदस्ति यत्र शकुनीन् अधिकृत्य मार्कण्डेयेन जैमिनिं प्रति सर्वधर्माणां प्रतिपादनं कृतम् । मत्स्य-नारद-ब्रह्मवैवर्त्त-श्रीमद्भागवतानुसारं मार्कण्डेयपुराणे ९०००श्लोकाः सन्ति, परन्तु समुपलभ्यमानेऽस्मिन् पुराणे केवलं ६९००श्लोकाः समुपलभ्यन्ते । अत्र च १३७अध्यायाः सन्ति ।

**वर्ण्यविषयाः** - पुराणस्यास्य वर्ण्यविषयेषु प्रमुखोऽस्ति दुर्गासप्तशती । अत्र जगन्मातुः सर्वस्वरूपायाः शक्तिरूपायाः दुर्गायाः रुचिरं चरित्रं विस्तरशः चित्रितमस्ति । अत्र मधुकैटभ-चण्डमुण्ड-शुम्भनिशुम्भादीनां देवीकृतवधः वर्णितोऽस्ति । मार्कण्डेयपुराणस्य ७८-९० अध्यायं यावत् त्रयोदशाध्यायेषु देवीचरितं वर्णितमस्ति ।

पुराणेऽस्मिन् सत्याः मदालसायाः चरितम् आदर्शनारीचरितरूपेण समुपस्थापितम् । मदालसा स्वपुत्रान् उद्दिश्य यान् यान् उपदेशान् दत्तवती ते एव प्रत्येकं माता स्वपुत्राय दातव्याः । सा प्रथमपुत्रत्रयं लालनपालनकालेऽपि एवं वैराग्यस्य उपदेशं प्रदत्तवती येन ते त्रयः पुत्राः विरक्ताः सन्तः भगवद्भक्ताः जाताः । चतुर्थपुत्राय अलर्काय च ज्ञानयोगस्य उपदेशं दत्त्वा राजानमपि तं ज्ञानयोगिनं कारयामास । अलर्कः ज्ञान-कर्मयोगयोः अपूर्वसामञ्जस्यं स्थापयित्वा राज्यशासनं चकार । अतः मदालसया अलर्काय प्रदत्तोपदेशः विश्वसाहित्येऽपि विरलः -

धरामरान् पर्वसु तर्पयेथाः समीहितं बन्धुषु पूरयेथाः ।
हितं परस्मै हृदि चिन्तयेथा मनः परस्त्रीषु निवर्तयेथाः ।।
सदा मुरारिं हृदि चिन्तयेथाः तद्ध्यानतोऽन्तः षडरीन् जयेथाः ।
मायाप्रबोधेन निवारयेथा अनित्यतामेव विचिन्तयेथाः ।। मा. पु. २६/३६-३७

मदालसायाः अयमेव आन्तरिकोऽभिलाषः आसीत् यत् तद्गर्भादुत्पन्नः न कोऽपि पुत्रः विषयासक्तो भवतु भवाटव्यां च भ्रमत्विति । अतः सा ज्ञानवैराग्योपदेशं कुर्वन्ती आसीत् ।

पुराणेऽस्मिन् सर्वप्रथमं धर्मसंज्ञकपक्षिणां जन्मनिरूपणं, तेषां पूर्वजन्मकथा, तेभ्यः इन्द्रशापप्रदानं चेति विषयाः समुपस्थापिता । तदनन्तरं बलदेवतीर्थयात्रा, द्रौपदीपुत्राणामाख्यानं, हरिश्चन्द्रचरितम्, आडिवकयुद्धं, कार्तवीर्याख्यानं, मदालसोपाख्यानम्, अलर्कचरितं, द्वीपवर्षादिवर्णनं, चतुर्दशमनूनां चरितम्, अष्टममन्वन्तरे आदिशक्तेः प्रथम-मध्यम-उत्तमचरितेषु महाकाली-महालक्ष्मी-

महासरस्वतीनाम् चरित्रचित्रणं, सूर्योत्पत्ति-माहात्म्यनिरूपणं, वैवस्वतवंशवर्णनं, खनित्रचरितम्, अविक्षितचरितं, मरुत्त-करन्धम-नाभागादिचरितं चेति विषयाः प्रकाशिता वर्त्तन्ते । पुराणेऽस्मिन् मन्वन्तराणां विस्तृतवर्णनं ६९-८०अध्यायेषु वर्त्तते । पुराणलक्षणानुसारं पुराणेऽत्र सर्गादिविषयाः सम्यक्तया प्रतिपादिताः सन्ति । अत्र च वैदिकीनाम् इष्टीनाम् अर्थात् यागानां निर्देशोऽस्ति । उत्तमनामकेन मनुना मित्रवृन्दानामिकया इष्ट्या स्वकीया परित्यक्ता पत्नी पाताललोकात् प्राप्तेति कथा पुराणेऽस्मिन् वर्त्तते । अत्र च दत्तात्रेयः अलर्काय राजधर्म-वर्णाश्रमधर्म-स्वर्गनरकस्वरूप-श्राद्धविधि-कर्मविपाक-सदाचार-योगादीनाम् उपदेशं दत्त्वा तद्विषयेषु महत्त्वपूर्णं दिग्दर्शनं प्रदत्तवान् इति ।

**स्थानकालविवेचनम्** - अस्मिन् पुराणे सह्यपर्वतस्योत्तरभागस्था गोदावरीतीरभूमिः सर्वोत्तमा पवित्रतमा मनोरमा चेति वर्णिताऽस्ति । अतः समालोचकानां मते पुराणस्यास्य रचना तत्रैव स्यादिति ।

पुराणस्य बहवः श्लोकाः निबन्धकारैः स्वस्वनिबन्धेषु उद्धृताः सन्ति । कल्पतरौ योगविषयकाः प्रायः १२०श्लोकाः, अपरार्केण ८५श्लोकाश्च उद्धृताः प्राप्यन्ते । अतोऽस्मात् अनुमीयते यत् पुराणमिदं गुप्तकालीनं स्यादिति ।

**बोधप्रश्नाः**

१. सांप्रतम् उपलभ्यमाने मार्कण्डेयपुराणे कति श्लोकाः प्राप्यन्ते ?

२. मार्कण्डेयपुराणे श्रोता कः ?

३. दुर्गासप्तशती मार्कण्डेयपुराणस्य केषु अध्यायेषु वर्त्तते ?

४. अलर्कः कः ?

५. पुराणस्यास्य रचनास्थानं किं स्यात् ?

**८. अग्निपुराणम् –**

मत्स्यपुराणानुसारम् अग्निपुराणम् ईशानकल्पवृत्तान्ताऽधारेण स्वयम् अग्निना वशिष्ठाय प्रदत्तोपदेशः एव वर्त्तते, यत्रैव षोडशसहस्रश्लोकाः सन्ति । परन्तु नारदीयपुराणानुसारं पुराणेऽस्मिन् पञ्चदशसहस्रश्लोकाः सन्ति । पुराणेऽत्र ३८३ अध्यायाः वर्त्तन्ते ।

**वर्ण्यविषयाः** – अग्निपुराणे बह्वीनाम् उपयोगिनीनां विद्यानां संग्रहः लोककल्याणाय कृतोऽस्ति । अतः पुराणमिदं भारतीयविद्याकोशः इति कथ्यते । पुराणस्यास्य प्रथमाध्याये विष्णोः माहात्म्यं वर्णितम् । ततश्च द्वितीयाध्यायात् चतुर्थाध्यायं यावत् मत्स्य–कूर्म–वराहावताराणां वर्णनं कृतम् । ततश्च पञ्चमाध्यायात् एकादशाध्यायपर्यन्तं रामायणसारः प्रदत्तः । तत्र रामावतारस्य मनोरमं वर्णनं कृतम् । तत्प्रसङ्गे बालिवधानन्तरं सीतान्वेषणायोजने विलम्बं कुर्वतः सुग्रीवस्य समीपे रामेण प्रेषितः लक्ष्मणः गत्वा तं सक्रोधम् उवाच –

तदाब्रवीत्तं रामोक्तं लक्ष्मणो व्रज राघवम् ।
न च संकुचितः पन्था येन बाली हतो गतः ।।
समये तिष्ठ सुग्रीव मा बालिपथमन्वगाः । अ.पु.८/६$^{1/2}$

अग्रे च सीताहरणप्रसङ्गे रावणमारीचयोः प्रश्नोत्तरकाले मायामृगरूपेण रामकुटीरं प्रति गमनविषये मारीचस्य विचारपूर्णं वाक्यं सैद्धान्तिकमासीत् –

रावणादपि मर्तव्यं मर्तव्यं राघवादपि ।
अवश्यं यदि मर्तव्यं वरं रामो न रावणः ।। १४/६

रामायणसारानन्तरं १२–१४ अध्यायेषु हरिवंशवर्णनकाले महाभारतसारः वर्णितः । तत्र महाभारतयुद्धे सर्ववीराणां निधनान्तेऽपि दुर्योधनपक्षीयाः त्रयः पाण्डवपक्षीयाश्च सप्तवीराः अवशिष्टाः आसन् –

कृतवर्मा कृपो द्रौणिस्त्रयो मुक्तास्ततो रणात् ।
पाण्डवाः सात्यकिः कृष्णः सप्त मुक्ता न चापरे ।। १३/२४

अस्मिन् पुराणे प्रदत्तं भगवत् शब्दस्य निर्वचनं नितरां ज्ञातव्यमस्ति –

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवान् इति ।। ३९/१३

अस्मिन् पुराणे च चतुर्णाम् उपवेदानां, वेदाङ्गानां, दार्शनिकविषयाणाञ्च प्रतिपादनेन सह

पशुचिकित्सा, वास्तुविद्या, रत्नपरीक्षा, ज्योतिषायुर्वेदधर्मशास्त्रवर्णनं, मन्दिरनिर्माणं, गृहशिल्पकला चेति विद्यानां निरूपणं कृतं दृश्यते । काव्यशास्त्रस्य निरूपणप्रसङ्गे अलंकारशास्त्रस्य विवेचनं प्रामाणिकतया कृतम् । तथा च छन्दःशास्त्रस्यापि विवेचनं प्रदत्तम् । किञ्च कौमारव्याकरणस्य, एकाक्षरकोशस्य, नामलिङ्गानुशासनस्य च प्रतिपादनं विहितम् । योगाङ्गानां यमनियमादीनां विचारः, अद्वैतवेदान्तसारसंकलनं, गीतासारप्रकाशनञ्च समुपस्थापितम् । अत्र च अर्थशास्त्र-गान्धर्वशास्त्र-तन्त्रशास्त्र-दान-व्रताभिषेक-देवताप्रतिष्ठा-वर्णाश्रमव्यवस्था-युद्धविद्या-सामुद्रिकविज्ञान-स्त्रीपुरुषलक्षण-मृतसंजीवनीप्रयोग-सम्मोहनादिविधि-औषधिपरीक्षादिबहुविषयाः विवेचिताः । एवं पुराणेऽस्मिन् सर्वा विद्याः प्रदर्शिताः इति स्वयम् अग्निपुराणं समुद्घोषयति । तद्यथा -

नास्मात् परतरं भूमौ विद्यते वस्तु दुर्लभम् ।
आग्नेये हि पुराणेऽस्मिन् सर्वा विद्याः प्रदर्शिताः ।। ३८३/५१

**स्थानकालविवेचनम्** - अग्निपुराणे प्रदत्तानां तान्त्रिकप्रयोगानां प्रचलनम् अधुनाऽपि वंगप्रदेशे दृश्यते इति हेतोः पुराणस्यास्य रचना वङ्गप्रदेशस्य पश्चिमभागे स्यादिति हाजरामहोदयस्य मतम् ।

पुराणेऽस्मिन् बहुविषयाणां समावेशात् अनुमीयते यत् पुराणमिदं कालक्रमेण विविधविषयाणां संग्रहेण परिपुष्टमस्ति । काव्यशास्त्रदृष्ट्या पुराणमिदं भोजराजकृत-सरस्वतीकण्ठभरणस्य उपजीव्यमस्ति । अर्थात् अग्निपुराणाधारेण सरस्वतीकण्ठाभरणं रचितम् । भोजस्य कालात् एकादशशतकात् प्राचीनमिदं स्यात् । पुनश्च दण्डिनः काव्यादर्शग्रन्थस्याधारेण अग्निपुराणस्य काव्यशास्त्रीयोंऽशः प्रस्तुतः इति हेतोः दण्डिसमयात् सप्तमशतकात् अर्वाचीनं पुराणमिदं स्यात् । अतः पुराणमिदं सप्तम-एकादशशतकमध्ये विरचितमिति समालोचकानां मतम् इति ।

**बोधप्रश्नाः**

१. नारदीयपुराणानुसारम् अग्निपुराणे कियन्तः श्लोकाः वर्त्तन्ते ?

२. पुराणस्यास्य श्रोता कः ?

३. रामायणसारः केषु अध्यायेषु विद्यते ?

४. महाभारतयुद्धान्ते के के जीविताः आसन् ?

५. पुराणस्यास्य उपजीव्यं किं काव्यशास्त्रम् अस्ति ?

**९. भविष्यपुराणम् –**

मत्स्यपुराणानुसारं चतुर्मुखेन ब्रह्मणा मनुं प्रति भगवतः सूर्यस्य वर्णनं कृत्वा अघोरकल्पवृत्तान्तप्रसङ्गे जगत्स्थितेः भूतसमूहस्य च लक्षणं भविष्यच्चरितं च बाहुल्येन यत्र वर्णितं, तदेव भविष्यपुराणं कथ्यते । अत्र १४५००श्लोकाः सन्ति । परन्तु नारदीयपुराणमते भविष्यपुराणं समानतया सर्वदेवप्रतिपादकं, सर्वाभीष्टदायकं, चतुर्दशसहस्रश्लोकात्मकं चास्ति ।

भविष्यपुराणमिदं पञ्चसु पर्वसु विभक्तं वर्त्तते – १. ब्राह्मपर्व, २. वैष्णवपर्व, ३. शैवपर्व, ४. सौरपर्व, ५. प्रतिसर्गपर्व च । एवं पञ्चसु पर्वसु ६०५ अध्यायाः सन्ति ।

**वर्ण्यविषयाः** – भविष्यपुराणे सृष्टेः भूगोलस्य च विस्तृतवर्णनं समुपलभ्यते । सूर्योपासनायाः मुख्यप्रतिपादकं पुराणमस्ति भविष्यपुराणमिदम् । अत्र सूर्यस्थब्रह्मनिरूपणं, विविधरङ्गपुष्पार्पणस्य विधानं फलञ्च निर्दिष्टमस्ति । अत्र च व्रतोपासनाविधि–त्याज्यपदार्थरहस्य–वेदाध्ययनविधि–गायत्रीमाहात्म्य–सन्ध्यावन्दनकाल–चतुर्वर्णविवाहव्यवस्था–सर्पदंशननिवारणविधि–विषहारिणी–मृतसंजीवनीगुटिकावर्णन–कलिराजवंशावलीतिविषयाणां प्रतिपादनं विद्यते ।

भविष्यपुराणस्य ब्राह्मपर्वणि शाकद्वीपिब्राह्मणानां शाकद्वीपात् आनयनवृत्तं वर्णितमस्ति । कृष्णपुत्रः साम्बः एषाम् आनयनं कृतवान् । पुराणेऽस्मिन् एतेषां ब्राह्मणानां नीतयः रीतयश्च प्रदर्शिताः सन्ति । एतेषां रीति–नीतयः पश्चिमभारतीय–रीतिनीतिभिः सह पारसीय रीतिनीतिभिश्च सह समानाः दृश्यन्ते । साम्बः स्वकुष्ठरोगस्य शान्तये सूर्योपासनां कर्तुं यदा भारते पुरोहितं न प्राप्तवान् तदा

नारदोपदेशात् गरुडद्वारा शाकद्वीपात् अष्टादशप्रकारान् मगब्राह्मणान् आनीतवान् । तत्कृतसूर्योपासनाबलेन च स रोगमुक्तो जातः । भगवतः श्रीकृष्णस्याज्ञया ते मगब्राह्मणाः यादवकन्याभिः सह विवाहं कृतवन्तः ।

**विवेचनम्** – पुराणस्यास्य सम्बन्धे बहूनां समीक्षकाणाम् आपत्तयः सन्ति । तेषां मते एतत्पुराणवर्णिताः बहुकथाः आधुनिक्यः सन्ति । परन्तु अन्येषां केषांचित् समीक्षकाणां मते व्यासदेवस्य त्रिकालदर्शित्वात् भविष्यत्कथानां प्रत्यक्षीकरणं नैव संशयापन्नं मन्तव्यम् । नोचेत् भविष्यपुराणस्य नामसार्थकता नैव स्यादिति । अस्य मतस्य यथार्थत्वेऽपि पुराणस्यास्य प्रतिसर्गपर्व मूलरूपेण अधुना नोपलभ्यते इति अनुमीयते । अत्र बहुनवीनकथानां, नवीनशब्दानां, सम्प्रदायानां व्यक्तीनां देशानां नगराणाञ्च नामनिर्देशात् प्रक्षेपस्याशङ्का जायते । श्लोकनिर्माणशैली अपि नवीना प्रतिभाति । पुनश्च नारदीयपुराणप्रदत्तसूच्यनुसारम् एते अंशा अपि नोपलभ्यन्ते इति हेतोः अत्र प्रक्षिप्ताशंस्य बहुलता स्यात् । पण्डित ज्वालाप्रसादमिश्रः चतुर्विधं भविष्यपुराणं प्राप्य समीक्ष्य च एतदेव कथयति यत् अधुनोपलभ्यमानं भविष्यपुराणं सर्वेषां चतुर्णां भविष्यपुराणानां मिश्रितरूपं विद्यते । प्राप्तेषु भविष्यपुराणेषु चतुर्थापेक्षया प्रथम-द्वितीय-तृतीयानि अर्वाचीनानि सन्ति । परन्तु एतेषु चतुर्षु भविष्यपुराणेषु परस्परं भेदो दृश्यते ।

अधुना श्रीवेङ्कटेश्वरप्रेस्, मुम्बइतः प्रकाशितं भविष्यपुराणमेकं समुपलभ्यते यत्रैव पुराणलक्षणस्य संगतिः नास्ति, श्लोकसंख्यायां साम्यं च नास्ति । पुनश्चेदं नवीनतासंयोजनेन प्रक्षेपबहुलमस्ति । एतदतिरिक्तं नवलकिशोरप्रेस्, लखनउतः, प्रकाशितं भविष्यपुराणमेकं समुपलभ्यते, यत्रैव पूर्वार्द्धम् उत्तरार्द्धं चेति खण्डद्वयम् उपलभ्यते । तत्र पूर्वार्द्धे ४१ उत्तरार्द्धे च १७१, सङ्कलनेन २१२ अध्यायाः वर्त्तन्ते ।

मत्स्य-नारदीयपुराणयोः भविष्यपुराणस्य या विषयानुक्रमणिका प्रदत्तास्ति तया सह साम्प्रतं समुपलभ्यमानस्य भविष्यपुराणस्य प्रायः साम्यं प्राप्यते । पुराणस्यास्य कालविषये एतदेव अनुमातुं शक्यते यत् अलबरूणिना प्रदत्तायां पुराणसूच्यां भविष्यपुराणस्योल्लेखात् पुराणस्यास्य रचना दशमशताब्द्याः पूर्वमेव कृता स्यादिति ।

**बोधप्रश्नाः**

१. भविष्यपुराणस्य वक्ता कः ?

२. मत्स्यपुराण-नारदीयपुराणयोः मतेन भविष्यपुराणे कति श्लोकाः सन्ति ?

३. पुराणमिदं कियत्सु पर्वसु विभक्तमस्ति ? तेषां नामानि च कानि ?

४. शाकद्वीपिब्राह्मणानां भारताऽनयनवृत्तं भविष्यपुराणस्य कस्मिन् पर्वणि वर्त्तते ?

५. भविष्यपुराणस्य रचना कस्मिन् शतके स्यात् ?

**१०. ब्रह्मवैवर्त्तपुराणम् -**

मत्स्यपुराणानुसारं सावर्णिमनुना देवर्षिनारदं प्रति रथन्तरकल्प-वृत्तान्ताश्रयेण भगवतः श्रीकृष्णस्य वराहस्य च चरितं यत्र वर्णितं, यस्य च श्लोकसंख्या अष्टादशसहस्रात्मिकाऽस्ति तदेव ब्रह्मवैवर्त्तपुराणमिति कथ्यते । नारदपुराणमतेन च पुराणमिदं सावर्णिना नारदं प्रति प्रोक्तं, धर्मार्थकाममोक्षाणां प्रतिपादकं, वेदमार्गप्रदर्शकं, विष्णुशिवयोः अभेदप्रतिपादकं च दशमपुराणमस्ति ।

शिवपुराणं ब्रह्मवैवर्त्तपुराणस्य नामनिर्वचनं करोति यत् ब्रह्मणः जगद्रूपेण विवर्त्तस्य प्रतिपादनात् पुराणस्य नाम ब्रह्मवैवर्त्तमिति -

विवर्त्तनात् ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते । शि. पु. उ. सं. ४४/१३३

पुराणेऽस्मिन् चत्वारः खण्डाः सन्ति - १. ब्रह्मखण्डः, २. प्रकृतिखण्डः, ३. गणेशखण्डः,

४. श्रीकृष्णजन्मखण्डश्चेति । एतेषु खण्डेषु क्रमशः ३०, ५७, ४६, १३३ एवं सकंलनेन २६६ अध्यायाः वर्त्तन्ते ।

**वर्ण्यविषयाः** – ब्रह्मवैवर्त्तपुराणस्य प्रथमे ब्रह्मखण्डे परब्रह्मणः स्वरूपप्रतिपादनं कृतमस्ति । अस्यैव परब्रह्मणो ध्यानादिकं योगिनः, सन्तः, वैष्णवाश्च कुर्वन्ति । द्वितीये प्रकृतिखण्डे प्रकृतेः स्वरूपं प्रकाशितमस्ति । इयमेव भगवतः श्रीकृष्णस्याऽदेशानुसारं जगत्सृष्ट्याद्यर्थम् आत्मानं दुर्गा–लक्ष्मी–सावित्री–सरस्वती–राधादिरूपेण प्रकाशयति । एवमस्मिन् प्रकृतिखण्डे सावित्रीप्रभृतीनां देवीनां पवित्रचरितं, जीवानां कर्मविपाकः, शालग्रामशिलास्वरूपं, मन्त्रस्तोत्रकवचादीनां प्रकृति–लक्षणनिरूपणं, पुण्यात्मनां पापिनां च स्थाननिर्देशः, नरकनिरूपणं चेति विषयाः वर्णिताः । तृतीये गणेशखण्डे प्रथमतः गणेशजन्मवृत्तं वर्णितम् । ततश्च स एव श्रीकृष्णरूपेणाऽवतीर्ण इति प्रकाशितः । अस्मिन् च खण्डे गणेशभृगुसंवादः, गुप्तस्तोत्रमन्त्रतन्त्रकवचादीनां निर्देशश्च प्रकाशितः । अत्र च अतिथिसत्कारस्य सुमहत्त्वं प्रतिपादितं यत् अतिथेः अपूजनात् सर्वे पितरः, देवाः, अग्नयः, गुरवश्च अपूजिता भवन्त्येव । तद्यथा –

अपूजितोऽतिथिर्यस्य भवनाद् विनिवर्त्तते ।
पितृदेवाग्नयः पश्चात् गुरवो यान्त्यपूजिताः ।। ब्र.वै. ग.ख. ८/३९

अत्र च पञ्चप्रकारकाः पितरः पञ्चप्रकारकाः पुत्राश्च कथिताः सन्ति । पितरः यथा –

विद्यादाताऽन्नदाता च भयत्राता च जन्मदः ।
कन्यादाता च वेदोक्ता नराणां पितरः स्मृताः ।। ८/४४

पुत्राश्च यथा – भृत्यः शिष्यश्च पोष्यश्च वीर्यजः शरणागतः ।
धर्मपुत्राश्च चत्वारो वीर्यजो धनभागिति ।। ८/४९

अस्मिन् च खण्डे स्वधर्मरक्षायै महान् उपदेशः प्रदत्तोऽस्ति यत् धर्मात् श्रेष्ठः बन्धुः, धनं, प्रियश्च नास्तीति हेतोः स एव रक्षणीयः । किञ्च सत्यात् श्रेष्ठः धर्मः, अनृतात् परं पापं, गङ्गासमं तीर्थं, केशवात् परं देवश्च नास्तीति (६०/२१–२२) ।

चतुर्थे श्रीकृष्णजन्मखण्डे भगवतः श्रीकृष्णस्य जन्म–बाललीला–रासलीला–असुरसंहार–भूभारहरणादिलीलाभिः सह राधास्वरूपमपि चमत्कारितया वर्णितं वर्त्तते । अत्र च गुरोः स्वरूपप्रदर्शनपूर्वकं तत्सेवायाः महत्त्वं प्रदर्शितमस्ति –

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुरेव स्वयं शिवः ।
गुरौ हि सर्वदेवाश्च तिष्ठन्ति सततं मुदा ।। श्री. ज. ख. ८३/१४

**विवेचनम्** – नारदीयपुराणानुसारं ब्रह्मवैवर्त्तस्य ब्रह्मखण्डे सृष्टिप्रकार–ब्रह्मनारदविवाद–नारदस्य शिवलोकगमन–तत्र ज्ञानलाभादिविषयाः प्राप्यन्ते । परन्तु नारदमरीच्योः सिद्धाश्रमगमनवृत्तं सावर्णिकथा च नोपलभ्यते; तथा च प्रकृतिखण्डे श्रीकृष्णमाहात्म्यस्य उल्लेखमात्रम् अस्ति । परन्तु साम्प्रतिके ब्रह्मपुराणे तत् नोपलभ्यते । एवं मत्स्य–नारदादिपुराणानुसारं प्रचलित–ब्रह्मवैवर्त्तस्य साम्यं नास्ति । रथन्तरकल्पप्रसङ्ग–नारदसावर्णिसंवाद–ब्रह्मवराहवृत्तान्त–ब्रह्मविवर्त्तप्रसङ्गाः प्रचलिते ब्रह्मवैवर्त्ते न प्राप्यन्ते ।

मत्स्य–शिवपुराणानुसारं पुराणमिदं ब्रह्ममहिमप्रकाशकं वर्त्तते । स्कन्दपुराणस्य 'सवितुर्ब्रह्मवैवर्त्तम्' इति वचनानुसारं पुराणमिदं सूर्यमहिमप्रकाशकमस्ति । परन्तु स्वयं ब्रह्मवैवर्त्ते विष्णोः महिमप्रकाशात् हेतोः पुराणमिदं वैष्णवपुराणं मन्यते ।

पुराणलक्षणप्रसङ्गे पुराणमिदं श्रीमद्भागवतवत् महापुराणानां दशलक्षणत्वम् उपपुराणानाञ्च पञ्चलक्षणत्वं प्रतिपादयति । पुराणञ्चेदं समस्तज्ञानस्य आकरः, वैष्णवानां विशेषतः गौडीयवैष्णवानां मान्यतमं पुराणमस्ति । तथापि पुराणेऽस्मिन् बहवः प्रक्षिप्तांशाः समुपलभ्यन्ते । शङ्करजातेः उत्पत्तिवर्णनप्रसङ्गे कथिमस्ति यत् म्लेच्छात् कुविन्दकन्यायाम् उत्पन्नजातिः जोला बभूव । जोलाच्च कुविन्दकन्यायाम् उत्पन्ना जातिः शराकः इति कथ्यते । इमौ जोला–शराकौ अवान्तरजातिविशेषौ स्तः ।

पुराणस्यास्य परंपराप्रसङ्गे कथितं यत् पुरा भगवान् श्रीकृष्णः गोलोके ब्रह्मणे पुराणमिदं दत्तवान् । तेन ब्रह्मणा पुष्करतीर्थे धर्माय प्रदत्तम् । तेन स्वपुत्राय नारायणाय इदं प्रदत्तम् । तेन च नारायणेन नारदाय, नारदेन च गङ्गातटे व्यासाय, तेन च सिद्धिक्षेत्रे सूताय पुराणमिदं प्रदत्तमिति पुराणस्यास्य परम्पराऽस्ति ।

पुराणस्यास्य रचनास्थानविषये समालोचकानां मतं यत् पुराणेऽस्मिन् वङ्गीयरीति–विश्वासाऽचारादीनां विशेषवर्णनात्, वङ्गीयमान्यतानुसारं संकरजातीनां विशेषवर्णनात्, प्रकृतिखण्डस्य ४३–४५ अध्यायेषु वङ्गीयदेवीनां मनसा–मङ्गला–चण्डीप्रभृतीनां पूजनविधिवर्णनाच्च पुराणमिदं वङ्गप्रदेशे रचितमिति ।

कालविषये च मतमस्ति यत् प्रकृतिखण्डे गणेशखण्डे च तान्त्रिकविषयाणाम् आधिक्येन उपलब्धत्वात् पुराणमिदं नवम-दशकशतकयोः लिखितं स्यात्; यतो हि नवम-दशमशतकयोः तान्त्रिकचर्चा बाहुल्येन कृताऽसीत् । राधावल्लभीसंप्रदायसमर्थितायाः श्रीराधायाः विशेषप्राधान्यात्, म्लेच्छानां निर्देशाच्च पुराणमिदं ९-१५ शतकमध्ये लिखितं स्यादिति समालोचकानां मतम् ।

**बोधप्रश्नाः**

१. केन मनुना ब्रह्मवैवर्त्तपुराणं कस्मै समुपदिष्टम् ?

२. ब्रह्मवैवर्त्तपुराणे कति खण्डाः कति अध्यायाश्च सन्ति ?

३. पञ्चप्रकारकाः पुत्राः के ?

४. पुराणस्यास्य कालः कः ?

**११. लिङ्गपुराणम् -**

मत्स्यपुराणानानुसारं लिङ्गपुराणम् अग्निमयलिङ्गे स्थितेन शिवेन अग्निकल्पप्रसङ्गे प्रोक्तं, धर्मार्थकाममोक्षाणां प्रतिपादकम् एकादशसहस्रश्लोकात्मकं चास्ति । नारदीयपुराणमते चेदं भागद्वये विभक्तमस्ति - पूर्वभाग उत्तरभागश्चेति । परन्तु स्वयं लिङ्गपुराणे कथितमस्ति यत् पुराणमिदम् ईशानकल्पप्रसङ्गे ब्रह्मणा प्रोक्तमिति । पुराणस्यास्य पूर्वार्द्धे १०८, उत्तरार्द्धे च ५५अध्यायाः सन्ति ।

**वर्ण्यविषयाः** - अस्मिन् पुराणे व्रत-दान-श्राद्ध-आश्चौचादिधर्मशास्त्रीयविषयाणां विस्तृत

वर्णनं समुपलभ्यते । शैवपुराणत्वात् पुराणेऽस्मिन् शैवव्रतानां तीर्थानां च आधिक्येन वर्णनं कृतं दृश्यते । ९२ अध्याये शिवनिवासभूतायाः काशीस्थतीर्थानां विवरणं प्रस्तुतम् । शिवपार्वत्योः लीलाभूमीनां काशीस्थोद्यानानां काव्यिकवर्णनं मनोहरं वर्त्तते । पुराणमिदं शैवव्रतानाम् अनुष्ठानविधेः ज्ञानाय महत् उपकारकं विद्यते । अस्योत्तरार्द्धे १३ अध्याये शिवस्याष्टमूर्त्तीनां वैदिकं नाम प्रकाशितमस्ति यथा – पृथिव्यात्मिकायाः शिवमूर्त्तेः नाम शर्वः, जलमूर्त्तेः नाम भवः, अग्निमूर्त्ते पशुपतिः, वायुमूर्त्तेः ईशानः, आकाशमूर्त्तेः भीमः, सूर्यमूर्त्तेः रुद्रः, सोममूर्त्तेः महादेवः, यजमानमूर्त्तेश्च नाम उग्रः इति । प्रतिमूर्त्ति च पत्नीपुत्रयोः नामापि भिन्नं वर्त्तते । ९६ अध्याये शरभरूपधारिणः शिवस्य नरसिंहेन सह वार्त्तालापः, ९८ अध्याये विष्णुकृतशिवसहस्रनामस्तोत्रं च प्रकाशितम् । अत्रैव शिवस्य वैदिकनामसंग्रहोऽस्ति । पुराणमिदं पाशुपतव्रतस्वरूपं माहात्म्यञ्च सम्यक् प्रकाशयति । परन्तु शिवस्वरूपमाहात्म्यप्रकाशकत्वेऽपि पुराणमिदं विष्णोः स्वरूपं माहात्म्यं च यथास्थानं प्रतिपादयति । शिवस्य विष्णोश्च प्रशंसां कृत्वापि कस्यचित् अन्यदेवस्य निन्दां नैव करोति पुराणमिदम् । शिवस्य लिङ्गमाध्यमेन पूजनं मनोरमतया वर्णितमस्ति । विश्वसृष्ट्यादिकम् अनेनैव शिवेन स्वभावतः कृतमिति प्रतिपादितम् । स्वभक्तानां कल्याणाय भगवान् शिवः २८ अवतारान् धृत्वा बहुलीलाः प्रकाशितवान् । तासाम् अवतारलीलानां वर्णनं सुमधुरं विहितम् । पुराणस्योत्तरभागे नवमेऽध्याये शैवदर्शनानुकूलं पशु–पाश–पतीनां विवेचनं कृतं दृश्यते । एवं पुराणमिदं शिवतत्त्वप्रकाशे अतीव महत्त्वपूर्णं प्रामाणिकं च मन्यते ।

**कालविवेचनम्** – पाशुपतसम्प्रदायस्य सिद्धान्तानां समुपस्थापकत्वात् पुराणमिदं सप्तमाऽष्टमशतकयोः आविर्भूतम् इति अनुमीयते । यतो हि सम्प्रदायस्यास्य उद्भवः यद्यपि द्वितीयशतके अभूत् तथापि विशेषाभ्युदयः सप्तमाष्टमशतकयोः जातः । अतः तदानीमेव तत्सम्प्रदायप्रभावः पुराणस्यास्योपरि आपतितः स्यात् । किञ्च नक्षत्राणां गणनारम्भः अश्विनीतः कृतत्वात्, मेषराशितः एव सूर्यादिग्रहाणाम् उल्लेखात्, बुद्ध–कल्क्योः नाम अवतारेषु ग्रहणात् च पुराणस्यास्य कालः सप्तमशतकात् पूर्वं स्यात् । अलवरुणीना पुराणसूच्यां ग्रहणात्, लक्ष्मीधरभट्टेन स्वकीयकल्पतरुग्रन्थे पुराणस्यास्य उद्धरणात् च पुराणस्य तत्पूर्ववर्त्तित्वं सिद्ध्यति । किञ्च पुराणस्यास्य नवमेऽध्याये योगस्य अन्तरायाणां वर्णनं योसूत्रस्य व्यासभाष्यस्य अक्षरशः अनुकरणेन कृतत्वात् अस्य रचनाकालः अष्टम–नवमशतके स्याताम् इति अनुमातुं शक्यते ।

**बोधप्रश्नाः**

१. मत्स्यपुराणानुसारं लिङ्गपुराणं कस्य कल्पस्य प्रसङ्गे केन प्रोक्तम् ?

२. शिवस्य जलमूर्त्तेः नाम किम् ?

३. पशुपाशपतीनां विवेचनं लिङ्गपुराणस्य कुत्र वर्त्तते ?

४. लिङ्गपुराणं कस्मिन् शतके निर्मितमिति अनुमीयते ?

**तृतीयांशसारः** - अस्मिन् तृतीयेंऽशे षट्पुराणानां विवेचनं कृतं वर्त्तते । प्रथमतः नादीयपुराणस्य स्वरूपं, वर्ण्यविषयाः, स्थानकालानुमानम्, इति विषयान् विविच्य परिचयः समुपस्थापितः । अत्र पुराणमिदं वृहत्कल्पप्रसङ्गे नारदेन कथितं, पञ्चविंशतिसहस्रश्लोकात्मकं, खण्डद्वयात्मकं, २०७अध्यायसम्बलितं चेति प्रकाशितम् । ततश्च सप्तम-मार्कण्डेयपुराणस्य परिचय- प्रसङ्गे तत्स्वरूपादिकं विवेचितम् । पुराणमिदं मार्कण्डेयेन जैमिनिं प्रति प्रोक्तं, नवसहस्रश्लोकात्मकं, १३७अध्यायविमण्डितं चास्ति । तदनन्तरम् अष्टमम् अग्निपुराणं विवेचितम् । पुराणस्यास्य स्वरूपादिप्रसङ्गे प्रकाशितं यत् ईशानकल्पप्रसङ्गे स्वयम् अग्निना वशिष्ठाय प्रोक्तं, षोडशसहस्रश्लोकात्मकं, ३८३ अध्याययुक्तं चेदं पुराणं वर्त्तते । सर्वविद्याप्रकाशकत्वात् पुराणमिदं भारतीयविद्याकोश इति कथ्यते । ततः नवम-भविष्यपुराणस्य परिचयः तत्स्वरूपादिविवेचनमाध्यमेन प्रस्तुतः । पुराणमिदं ब्रह्मणा मनुं प्रति अघोरकल्पप्रसङ्गे प्रोक्तं, १४५०० श्लोकान्वितं पञ्चपर्वात्मकं, २१२ अध्यायसमन्वितं चास्ति । अनन्तरं दशम-वैवर्त्तपुराणस्य परिचयः तत्स्वरूपादिविवेचनपूर्वकं प्रस्तुतः । तत्र पुराणमिदं सावर्णिमनुना देवर्षिनारदं प्रति रथन्तरकल्पवृत्तान्ताश्रयेण प्रोक्तम्, अष्टादशसहस्रश्लोकात्मकं, चतुःखण्डसमन्वितं, २६६ अध्यायविमण्डितं चास्ति । अन्ते च एकादश-लिङ्गपुराणस्य परिचयः प्रदत्तः । तत्र पुराणमिदम् अग्निमयलिङ्गे स्थितेन शिवेन अग्निकल्पप्रसङ्गे प्रोक्तम्,

एकादशसहस्रश्लोकान्वितं, भागद्वययुक्तं, १६३अध्यायविलसितं चास्ति । एवं षट् पुराणानां स्वरूपादिविवेचनपूर्वकं परिचयः अंशेऽस्मिन् प्रस्तुतः ।

**पारिभाषिकशब्दकोशः -**

१. कल्पः - ब्रह्मणो दिनमेकं कल्पः इति कथ्यते । स च पाद्मकल्पः श्वेतवाराहकल्पः, अघोरकल्पः इत्यादिनामभिः परिचितः ।

२. पशु-पाश-पतयः-पशुः भवति जीवः, पाशः भवति पशोः बन्धनहेतुः माया (अविद्या), पतिश्च पशु-पाशयोः नियन्ता, पशोः पाशच्छेदकः भगवान् सदाशिवः एव ।

**आदर्शप्रश्नाः**

**क) निबन्धात्मकप्रश्नाः -** २०/१५

१. नारदपुराणस्य स्वरूपं वर्ण्यविषयान् कालनिर्णयं च यथाधीतं प्रकाशयत ।

२. ब्रह्मवैवर्त्तस्यपुराणस्य स्वरूपादिविषये यत् पठितं समुपस्थाप्यताम् ।

३. मार्कण्डेयपुराणस्य लिङ्गपुराणस्य च वर्ण्यविषयान् विवेचयत ।

**ख) विश्लेषणात्मकप्रश्नाः** १२/१०

१. मार्कण्डेयपुराणस्य स्वरूपं विविच्य स्थानकालादिसमीक्षणं च कुरुत ।

२. अग्निपुराणस्य वर्ण्यविषयान् पठितग्रन्थदिशा समुपस्थापयत ।

३. भविष्यपुराणस्य वर्ण्यविषयान् लिखित्वा पुराणस्यास्य समीक्षणं कुरुत ।

**ग) लघूत्तरीयाः प्रश्नाः** ५

१. अग्निपुराणस्य स्वरूपं विलिख्य तस्य भारतीयविद्याकोशत्वं प्रतिपादयत ।

२. भविष्यपुराणस्य कालनिरूपणं कृत्वा तन्नामकरणस्य याथार्थ्यं प्रकाश्यताम् ।

३. ब्रह्मवैवर्त्तशब्दस्य निर्वचनं प्रदाय पुराणस्यास्य स्थानकालयोः विवेचनं कुरुत ।

४. लिङ्गपुराणस्य स्वरूपं कालविवेचनं च उपस्थापयत ।

**घ) एकाङ्कप्रश्नाः** १

१. मत्स्यपुराणमते नारदीयपुराणे कति श्लोकाः सन्ति ?

२. बौद्धमतस्य प्रबलखण्डनं कः दार्शनिकः कृतवान् ?

३. मदालसा का ?

४. मार्कण्डेयपुराणं कुत्र रचितं स्यात् ?

५. अग्निपुराणं कस्य कल्पस्य वृत्तान्तं प्रस्तौति ?

६. अग्निपुराणं कस्य अलंकारशास्त्रस्य उपजीव्यमासीत् ?

७. भविष्यपुराणे कियन्तः अध्यायाः सन्ति ?

८. नारदपुराणानुसारं ब्रह्मवैवर्त्तपुराणं केन कस्मै प्रोक्तम् ?

९. ब्रह्मवैवर्त्तपुराणे किंनामानः खण्डाः सन्ति ?

१०. लिङ्गपुराणे शिवस्य कियताम् अवताराणां वर्णनं विद्यते ?

**उत्तराणि** -

१. पञ्चविंशतिसहस्राणि श्लोकाः, २. कुमारिलभट्टः, ३. महाराजस्य अलर्कस्य माता, ४.सह्यपर्वतस्योत्तरभागस्थ-गोदावरीतीरभूमौ, ५.ईशानकल्पवृत्तान्तम्, ६. भोजराजकृतसरस्वतीकण्ठाभरणस्य, ७. ६०५ अध्यायाः, ८. सावर्णिमनुना देवर्षिनारदाय, ९. ब्रह्म-प्रकृति-गणेश-श्रीकृष्णजन्मखण्डनामानः , १०. अष्टाविंशत्यवताराणाम् ।

❖❖❖

# पञ्चमपत्रम्

## क-विभागः

## चतुर्थोऽशः (वाराह-स्कान्द-वामन-कूर्मपुराणानि)

**प्रस्तावना –** चतुर्थेऽस्मिन् अंशे चतुर्णां वराहपुराण-स्कन्दपुराण-वामनपुराण-कूर्मपुराणानां परिचयः प्रकाश्यते । परिचयप्रसङ्गे पुराणानां श्लोकसंख्या-अध्यायसंख्या-खण्डपर्वादिनामसंख्यादिस्वरूपं, वर्ण्यविषयाः, स्थानकालादिविवेचनं, पौराणिकसमीक्षणं चेति विषयाः आलोचयिष्यन्ते । एतेषां विषयाणाम् आधारेणैव सम्यक् परिचयः प्राप्तुं शक्यते । अतः पूर्वोक्तस्वरूपादिविषयाधारेण वाराहादिचतुर्णां पुराणानां परिचयः प्रदीयते ।

**उद्देश्यम्** – निम्नोक्तबिन्दूनाम् आधारेण परिचयं दातुं यत्नः क्रियते । तद्यथा –

- वराहपुराणस्य स्वरूप-वर्ण्यविषय-स्थानकालादिविवेचनम्
- स्कन्दपुराणस्य स्वरूप-वर्ण्यविषय-स्थानकालादिविवेचनम्
- वामनपुराणस्य स्वरूप-वर्ण्यविषयादिविवेचनम्
- कूर्मपुराणस्य स्वरूपादिविवेचनं च ।

**१२. वराहपुराणम् –**

मत्स्यपुराणानुसारं मानवकल्पप्रसङ्गे भगवता विष्णुना पृथिवीदेवीसमक्षं महावराहमाहात्म्यविषये प्रोक्तं, चतुर्विंशतिसहस्रश्लोकात्मकं च पुराणमस्ति वराहपुराणम् । नारदीयपुराणमते तु वराहपुराणं मानवकल्पप्रसङ्गे महर्षिव्यासेन प्रोक्तं, भगवतः विष्णोः माहात्म्य- प्रतिपादकं, चतुर्विंशतिसहस्रश्लोकनिबद्धं, पूर्वोत्तरभेदेन भागद्वययुक्तञ्च वर्त्तते । परन्तु साम्प्रतम् उपलभ्यमाने वराहपुराणे १७०००श्लोकाः समुपलभ्यन्ते । अत्र २१८ अध्यायाः सन्ति । पुराणस्यास्य पाठद्वयं प्राप्यते – दाक्षिणात्यपाठः गौडीयपाठश्च । अस्मिन् पाठद्वये गौडीयपाठः महत्त्वपूर्णः । कोलकातातः एसिआटिक् सोसाइटीद्वारा प्रकाशितेऽस्मिन् पाठे केवलं १०७०० श्लोकाः सन्ति । अस्माद् ज्ञायते पुराणस्यास्य बृहद्भागः अधुना नोपलभ्यते इति । द्वयोः पाठयोः विषयसाम्येऽपि अनेकपाठभेदाः अध्यायभेदाश्च वर्त्तन्ते । एकस्य विषयस्य वर्णने बहुस्थानेषु श्लोकभेदाः दृश्यन्ते । एतस्मात् अनुमीयते यत् एकमेव विषयमाधारीकृत्य द्वाभ्यां लेखकाभ्यां भिन्नग्रन्थौ लिखितौ इति ।

**वर्ण्यविषयाः** – वराहपुराणेऽस्मिन् बहूनां वैष्णवव्रतानाम् उल्लेखो वर्त्तते । विशेषतः भिन्नभिन्न मासानां द्वादशीव्रतानि विवेचितानि । तत्तन्मासे द्वादशीव्रतेन सह विष्णोः अवताराणां सम्बन्धः प्रदर्शितोऽस्ति । मार्गशीर्षशुक्लद्वादश्याः नाम मत्स्यद्वादशी, पौषस्य कूर्मद्वादशी, माघस्य वराहद्वादशी, फाल्गुनस्य नृसिंहद्वादशी, चैत्रस्य वामनद्वादशी, वैशाखस्य परशुरामद्वादशी, ज्येष्ठस्य रामद्वादशी, आषाढस्य कृष्णद्वादशी, श्रावणस्य बुद्धद्वादशी, भाद्रपदस्य कल्किद्वादशी, आश्विनस्य पद्मनाभद्वादशी च वर्त्तते । पुराणस्यास्य अंशद्वयम् अतीव महत्त्वपूर्णमस्ति – १. मथुरामाहात्म्यं, २. नचिकेतोपाख्यानं च । मथुरामाहात्म्यं १५२–१७२ अध्यायेषु वर्त्तते । अत्र त्रयोदशाध्यायैः मथुरास्थितानां सर्वेषां तीर्थानां स्वरूप-पूर्वोपाख्यान-माहात्म्यानां प्रतिपादनं विस्तरेण कृतं विद्यते । माथुरमण्डलस्य भौगोलिकी स्थितिरपि स्पष्टा भवति । द्वितीयं नचिकेतोपाख्यानं १९३–३१२ अध्यायेषु वर्त्तते यत्रैव यम-नचिकेतसोः संवादमाध्यमेन स्वर्गनरकयोरपि स्वरूपविवेचनं कृतं वर्त्तते । अत्र कथांशे कठोपनिषदः कथया सह साम्ये स्थितेऽपि आध्यात्मिकांशे न्यूनता वर्त्तते ।

अत्र व्रत-दान-श्राद्धाऽशौचादिधर्मशास्त्रीयविषयाणां बहुवर्णनं समुपलभ्यते । पुराणेऽस्मिन् साम्बस्थापितानां त्रयाणां सूर्यमन्दिराणाम् उल्लेखो वर्त्तते । एतानि मन्दिराणि विशिष्टेषु स्थानेषु यमुनादक्षिणभागे कालप्यां, कर्णपुरसमीपे, पश्चिममुलताने च प्रतिष्ठितानि सन्ति ।

पुराणेऽस्मिन् वैष्णवमतस्य स्पष्टं प्रतिपादनं विद्यते इति हेतोः वैष्णवपुराणत्वेन स्वीक्रियते । अत्र रामानुजसंप्रदाये स्वीकृतस्य नारायणस्य परमेश्वरत्वं, तस्याऽराधानादिप्रकारः, प्रतिद्वादशितदाराधनप्रक्रिया, धातुभेदेनप्रतिमानिर्माणविधिः, ज्ञानकर्मसमुच्चयः, पाञ्चरात्रविधानं चेति विषयाः सम्यक् प्रतिपादिताः वर्त्तन्ते ।

**कालादिविवेचनम्** – कल्पतरौ, चतुर्वर्गचिन्तामणौ, दानसागरे च पुराणस्यास्य बहुश्लोकानां उद्धरणानि दृश्यन्ते । कल्पतरौ पुराणस्यास्य व्रतविषयकाः १५० श्लोकाः, श्राद्धविषयकाः ४० श्लोकाश्च उद्धृताः । अतः पुराणमिदम् एतेषां धर्मशास्त्रीयनिबन्धग्रन्थानां सकाशात् प्राचीनं स्यात् । अपि चास्य वैष्णवमतानि रामानुजसंप्रदाये स्वीकृतत्वात् पुराणमिदं रामानुजात् पूर्वकालीनं स्यात् । अतः समीक्षकाः पुराणस्यास्य कालं नवम-दशमशतके स्वीकुर्वन्तीति ।

**बोधप्रश्नाः**

१. कस्य कल्पस्य प्रसङ्गे पुराणमिदं वर्णितमस्ति ?

.

२. मत्स्यपुराणमते पुराणेऽस्मिन् कियन्तः श्लोकाः वर्त्तन्ते ?

३. पुराणेऽस्मिन् कतिभागाः सन्ति ?

४. मथुरामाहात्म्यं पुराणास्यास्य केषु अध्यायेषु वर्त्तते ?

५. वराहपुराणस्याऽविर्भावकालः कः ?

**१३. स्कन्दपुराणम् –**

मत्स्यपुराणानुसारं स्कन्देन (कार्त्तिकेयेन) तत्पुरुषकल्पप्रसङ्गे माहेश्वरधर्माः नानाविधचरितानि च यस्मिन् एकशताधिकैकाशीतिसहस्र(८११००)श्लोकात्मके पुराणे कथितानि तदेव स्कन्दपुराणमिति निगद्यते। किन्तु नारदीयपुराणे स्कन्दपुराणं तत्पुरुषकल्प-प्रसङ्गे कथितं, सिद्धिप्रदायकं, धर्मप्रकाशकं, सप्तखण्डविमण्डितम् एकाशीतिसहस्रश्लोकात्मकं चेति कथितम् । परन्तु शिवपुराणे स्कन्द एव महेश्वरस्य मुखात् पुराणमिदं श्रुतवान् इति प्रकाशितम् –

यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षान्महेश्वरः ।
ततु स्कान्दं समाख्यातमेकाशीतिसहस्रकम् ।। शि.पु. उ.सं. ४४/१३३

स्वयं स्कन्दपुराणे प्रभासखण्डे पुराणस्यास्य परम्पराप्रसङ्गे कथितं यत् कैलासशिखरे भगवता शिवेन पार्वत्यै पुराणमिदं समुपदिष्टं, ततश्च पार्वत्या पुराणमिदं स्कन्दाय समुपदिष्टम् । स च स्कन्दः नन्दिनं कथयामासेति । रेवाखण्डे तु वायुः स्कन्दाय पुराणमिदं श्रावयामास, स च वशिष्ठाय श्रावयामासेति वर्तते ।

पुराणमिदं सप्तसु खण्डेषु विभक्तम् – १. माहेश्वरखण्डः, २. वैष्णवखण्डः, ३. ब्रह्मखण्डः, ४. काशीखण्डः, ५. अवन्तीखण्डः(रेवाखण्डः), ६. तापीखण्डः(नागरखण्डः), ७. प्रभासखण्डश्च । तेषु खण्डेषु च क्रमशः १७४, १५३, ७७, १००, ३८७, १७९, ४१४; संकलनेन १६७१अध्यायाः ८१००० श्लोकाश्च सन्ति ।

पुराणस्यास्य अपरोऽपि विभागः संहितात्मकः वर्त्तते । पुराणेऽस्मिन् सूतसंहितायां (अ.२०/ १२) कथितं यत् पुराणमिदं षट्संहितात्मकमिति । एतासां श्लोकसंख्याऽपि प्रदत्ता यत् – सनत्कुमारसंहितायां ३६००० श्लोकाः, सूतसंहितायां ६०००, शङ्करसंहितायां ३००००, वैष्णवसंहितायां ५०००, ब्राह्मसंहितायां ३०००, सौरसंहितायां १००० श्लोकाः, संकलनेन ८१००० श्लोकाः विद्यन्ते ।

एवं खण्डात्मकं संहितात्मकं चेति द्विविधं स्कन्दपुराणं वर्णितमस्ति । परन्तु इदानीं संहितात्मकं स्कन्दपुराणं पृथक्तया नोपलभ्यते केवलं खण्डात्मकमेव सर्वत्र उपलभ्यते ।

**बोधप्रश्नाः**

१. मत्स्यपुराणमते स्कन्दपुराणस्य श्लोकसंख्या का ?

२. पुराणमिदं कस्य कल्पस्य प्रसङ्गे केन समुपदिष्टम् ?

३. कतिखण्डेषु विभक्तमिदं पुराणम् ?

**वर्ण्यविषयाः** - खण्डात्मकस्य स्कन्दपुराणस्य प्रथमे माहेश्वरखण्डे शिवपार्वत्योः विविधलीलानां वर्णनं हृदयाह्लादकं वर्त्तते । अस्मिन् माहेश्वरखण्डे अवान्तरखण्डरूपेण स्थितयोः केदारखण्ड-कुमारिकाखण्डयोः पूर्वोक्तलीलावर्णनं विहितम् । किञ्च केदारखण्डे दक्षयज्ञकथा, समुद्रमन्थनाख्यानं, शिवपार्वतीविवाहः, कार्त्तिकेयोत्पत्तिः, तारकासुरेण सह देवानां युद्धं, नारदसमागमश्चेति विषयाः कथिताः । कुमारिकाखण्डे च पञ्चतीर्थकथानकं, धर्मवर्मकथानकं, नाडीजङ्घकथा, पृथिवीप्रादुर्भावः, तारकासुरवधः, द्वीपाख्यानं, ब्रह्माण्डस्थितिः, महाकालसमुद्भवः, वासुदेवमाहात्म्यं, पाण्डवकथा चेति प्रसङ्गाः वर्णिताः ।

द्वितीय-वैष्णवखण्डे प्रथमतः भूमिवाराहाख्यानं, ततः वेङ्कटाचलमाहात्म्यप्रसङ्गे कमलायाः कथा, श्रीनिवासस्य स्थितिश्चेत्यादिविषयाः कथिताः । तदनन्तरं पुरुषोत्तममाहात्म्यम् इन्द्रद्युम्नाख्यानं, रथयात्राविधिः, शयनोत्सवविधिः, दोलोत्सवविधिः, स्नानादिविधिः, बदरिकाश्रममाहात्म्यं, कार्त्तिकमाहात्म्यं, पञ्चभीष्मव्रताख्यानम्, एकादशीमाहात्म्यं, तद्विधिः, नाममाहात्म्यकीर्त्तनं, मथुरामाहात्म्यं, द्वादशवनमाहात्म्यं, श्रीमद्भागवतमाहात्म्यं, माघमाहात्म्यं, वैशाखमाहात्म्यम्, अयोध्यामाहात्म्यं चेति विषयाः कीर्त्तिताः ।

तृतीय-ब्रह्मखण्डस्य पूर्वभागे सेतुमाहात्म्यं, गालवस्य तपश्चर्या, चक्रतीर्थादिमाहात्म्यं, ब्रह्मकुण्ड-हनुमत्कुण्डादिमाहात्म्यं, रामतीर्थ-लक्ष्मीतीर्थ-शङ्खतीर्थ-गायत्रीतीर्थानां माहात्म्यं, धर्मारण्यमाहात्म्यम्, ऋषिवंशनिरूपणं, वर्णाश्रमधर्मनिरूपणम्, इन्द्रेश्वरमाहात्म्यं, द्वारकानिरूपणं, लोहासुरसमाख्यानं, श्रीरामचरितं, जीर्णोद्धारकथनं, जातिभेदकथनं, स्मार्त्तधर्मनिरूपणं, वैष्णवधर्मकथनं, चातुर्मास्यधर्मनिरूपणं, दान-व्रत-तपः-पूजादिप्रशंसा, शालग्रामनिरूपणं, तारकवधोपायः, हरताण्डवं, रामनाममाहात्म्यं, पार्वतीजन्मचरितं, तारकवधश्चेति प्रसङ्गाः समुपस्थापिताः ।

तृतीय-ब्रह्मखण्डस्योत्तरभागे शिवमहिमा, शिवपञ्चाक्षरमन्त्रमहिमा, शिवरात्रिमहिमा, प्रदोषव्रत-सोमवारव्रतविधिः, सदाचारनिरूपणं, भद्रायुचरितं, भस्ममाहात्म्यम्, उमामाहेश्वरव्रतमाहात्म्यं, रुद्राक्षमाहात्म्यं चेति विषयाः विवेचिता ।

ततः चतुर्थे काशीखण्डे विन्ध्यनारदसंवादः, अगस्त्याश्रमे सुराणाम् आगमनं, पतिव्रताचरित्रं, शिवशर्मचरितम्, अग्निसमुद्भवः, ग्रहलोक-सप्तर्षिलोक-ध्रुवलोक-तपोलोक-सत्यलोकादिनिरूपणं, गङ्गानामसहस्रं, वाराणसीप्रशंसा, सदाचारनिरूपणं, ब्रह्मचारि-गृहस्थ-वानप्रस्थादिधर्मकथनं, स्त्रीलक्षणं, कृत्याकृत्यनिर्देशः, दिवोदासकथा, काशीवर्णनं, पञ्चनदोत्पत्तिः, विन्दुमाधवसम्भवः, वैष्णवतीर्थाख्यानं, शैलेश-रत्नेश्वर-कृत्तिवासानां समुद्भवः, ओंकारेश्वरमाहात्म्यं गङ्गामाहात्म्यकीर्त्तनं, दक्षयज्ञोद्भवः, विश्वेशाविर्भावश्चेति विषयाः समुपन्यस्ताः ।

पञ्चमे अवन्तिखण्डे महाकालवनाख्यानं, प्रायश्चित्तविधिः, अग्नेः उत्पत्तिः, शिवस्तोत्रं, कपालमोचनाख्यानम्, अप्सरःकुण्डादिबहुतीर्थस्वरूपमाहात्म्यदिकं, कुशस्थल्याः अवन्त्याः उज्जयिन्याश्च अभिधानकीर्त्तनं, शिप्रास्नानविधिः, हिरण्याक्षवधः, विष्णुनामसहस्रं, नागपञ्चमीमहिमा, नृसिंहजयन्ती, रेवामाहात्म्यं, कल्पभेदेन नर्मदायाः नामभेदः, नर्मदायाः आर्षस्तवः, जलेश्वरकथा, गौरीव्रतं, त्रिपुरदाहः, अन्धकासुरवधः, दानधर्मनिरूपणम्, ऋष्यशृङ्गकथा, चित्रसेनकथा, शवरीचरितम्, आदित्येश्वरतीर्थ-शक्रतीर्थ-कुमारेश-लोकेश-नागेश-नन्दिकेश-रामेश्वर-सोमेश-कपिलेश-यमतीर्थ-नारायण-कोटीश-व्यासतीर्थ-प्रभास-मन्मथेश्वर-भाण्डीर-आङ्गीरसतीर्थ-भार्गवेश्वर-तापेश-वराहेश-रवीश्वर-हूँकारस्वामितीर्थ-संगमेश-मार्कण्डतीर्थ-माण्डव्यतीर्थ-कनखलेश-हंसक-सुवर्णक-आमलेश-कपालेशादितीर्थानां स्वरूपं माहात्म्यं च, रोहिताश्वकथा, धुन्धुमारवधाख्यानं चेति प्रसङ्गाः सम्यक् कीर्त्तिताः ।

ततः षष्ठे नागरखण्डे लिङ्गोत्पत्तिः, हरिश्चन्द्रकथा त्रिशङ्कुचरितं, वृत्रासुरवधः, जमदग्निवधाख्यानं, जाबालिचरितं, भार्गवचरितं, विश्वामित्रचरितं, प्रभास-पुष्कर-नैमिष-धर्मारण्यादितीर्थमाहात्म्यं, वाराणसी-द्वारका-अवन्तीपुरीणां माहात्म्यं, वृन्दावन-खाण्डवादिवनमाहात्म्यं, श्रीशैल-अर्वुद-रैवतादिपर्वतमाहात्म्यं, गङ्गा-नर्मदा-सरस्वतीमाहात्म्यं, युगमानकीर्त्तनम्, एकादशरुद्र-द्वादशादित्यकीर्त्तनं, दानमाहात्म्यकीर्तनञ्चेत्यादयः विषयाः कथिताः ।

सप्तमे प्रभासखण्डे सोमेश-सिद्धेश्वर-अग्नितीर्थ-केदारेश-गौरीश-वरुणेश-कुमारेश-दैत्यघ्नेश-चक्रतीर्थ-भूतेशादीनां तीर्थानां माहात्म्यं, चक्रधराख्यानं, साम्बादित्यकथा, महिषमर्द्दिनीकथा, शतमेध-लक्षमेधकथा, वाराहस्वामिवृत्तान्तः, कनकनन्दाकथा, कपिलेशकथा,

नागतीर्थकथा, वशिष्ठाश्रमवर्णनं, केदारक्षेत्रमाहात्म्यं, कात्यायनीमाहात्म्यं, पिण्डारकतीर्थमाहात्म्यं, मार्कण्डेयोत्पत्तिकथा, अविमुक्तक्षेत्रमाहात्म्यं, गोमती-सागरसंगममाहात्म्यं, गोपीनां द्वारकागमनं, द्वारकायां तीर्थानामागमनं, द्वारवत्यभिषेचनं, द्वारकावासफलञ्चेति प्रसङ्गाः विवृताः ।

एवं सप्तखण्डात्मकेऽस्मिन् स्कन्दपुराणे मुख्यतः तीर्थवर्णनमाध्यमेन भारतस्य भौगोलिकस्थितेः महत्त्वपूर्णपरिचयः प्रदत्तोऽस्ति ।

संहिताभेदेन विभक्तस्य पुराणस्यास्य सूतसंहिता शिवोपासनाप्रतिपादनविषये प्रमुखाऽस्ति । अत्र शिवपूजायाः वैदिकं तान्त्रिकं च रूपं प्रदर्शितमस्ति । संहितेयं चतुर्षु खण्डेषु शिवमाहात्म्यखण्डः, ज्ञानयोगखण्डः, मुक्तिखण्डः, वैभवखण्डश्चेति विभक्ता वर्त्तते । शिवमाहात्म्यखण्डे मुख्यतः शिवमाहात्म्यं, ज्ञानयोगखण्डे हठयोगः, मुक्तिखण्डे मुक्त्युपायाः, खण्डद्वयात्मके वैभवखण्डे च पूर्वभागे ज्ञानभक्तिसामञ्जस्यम् उत्तरभागे च ब्रह्मगीता-सूतगीतामाध्यमेन आत्मस्वरूप-तत्साक्षात्कारश्च निरूपितोऽस्ति । सौरसंहिता शिवपूजासम्बन्धिनां बहूनां विषयाणां प्रतिपादनं करोति । सनत्कुमारसंहिता च विंशत्यध्यायेषु शिवमहत्त्वं प्रतिपादयति ।

**बोधप्रश्नाः**

१. माहेश्वरखण्डः कतिखण्डेषु विभक्तः ?

२. वेङ्कटाचलमाहात्म्यं कस्मिन् खण्डे कीर्त्तितम् ?

३. शिवशर्मचरितं कस्मिन् खण्डे वर्त्तते ?

४. स्कन्दपुराणीयतीर्थ-क्षेत्र-वनादीनाम् अध्ययनेन मुख्यतः किं ज्ञातुं शक्यते ?

**कालविवेचनम्** - मिताक्षरा-कल्पतरुप्रभृतिषु प्राचीननिबन्धग्रन्थेषु स्कन्दपुराणस्य बहुश्लोकाः समुद्धृताः सन्ति । काणेमहोदयानां मतानुसारं कल्पतरौ विशेषतः बहुविषयकाः श्लोका उद्धृताः । परन्तु एतदाधारेण पुराणस्यास्य निर्दिष्टकालः निश्चेतुं न शक्यते; यतो हि सुविशालेऽस्मिन् पुराणे विभिन्नेषु कालेषु बहुप्रक्षिप्तांशाः सम्मिलिताः स्युः । तथापि हरप्रसादशास्त्री नेपालस्य राजकीयग्रन्थालये स्कन्दपुराणस्य सप्तमशताब्द्यां लिखितमेकं हस्तलिखितग्रन्थं प्राप्तवान् इति प्रमाणाधारेण पुराणस्यास्य कालः सप्तमशताब्दीपूर्वं स्यात् ।

डॉ. विलसन्प्रभृतीनां मते श्रीजगन्नाथमन्द्रिरस्य आधुनिकत्वात्, तद्वर्णनं स्कान्दे च कृतत्वात् पुराणमिदम् एकादशशताब्दीरचना स्यादिति । किन्तु वास्तवतः श्रीजगन्नाथस्य वेदप्रतिपादितत्वात् तन्मन्दिरमपि बहुप्राचीनम् । केवलम् अनन्तरं तज्जीर्णोद्धारः कृत इति हेतोः तदाधारेण तत्समयः अर्वाचीनः न स्यात् । अतः पूर्वोक्त-सप्तमशतकात् पूर्वमेव स्कन्दपुराणस्य कालः स्यात् इति अनुमीयते ।

**बोधप्रश्नौ**

१. कस्य प्रमाणस्याधारेण स्कन्दपुराणस्य रचनाकालः सप्तमशतकात् पूर्वमिति अनुमीयते ?

२. डॉ. विलसन्मते स्कन्दपुराणस्य कालः कः स्यात् ?

**१४. वामनपुराणम् -**

मत्स्यपुराण-नारदपुराणयोः मतानुसारं वामनपुराणं चतुर्मुखब्रह्मणा कूर्मकल्पप्रसङ्गे प्रोक्तं भगवतो वामनस्य चरितप्रतिपादकं, त्रिवर्गप्रकाशकं, दशसहस्रश्लोकविशिष्टं च वर्त्तते । नारदपुराणमते चेदं भागद्वयसमायुक्तं वर्त्तते ।

वामनपुराणस्य परम्पराविषयकवर्णनात् ज्ञायते यत् महर्षिपुलस्त्येन पुराणमिदं प्रथमतः देवर्षिनारदाय समुपदिष्टम् । ततश्च नारदात् व्यास-लोमहर्षणादिक्रमेण अस्य प्रचारोऽभूत् इति । अतः नारदपुराणमते पुराणस्यास्य वक्ता पुलस्त्यः श्रोता च देवर्षिनारदोऽस्ति । पुराणस्यास्य दशसहस्रश्लोकात्मकत्वं स्कन्दपुराणं, स्वयं वामनपुराणं च समर्थयतः ।

नारदपुराणमतानुसारं वामनपुराणं पूर्वभागः उत्तरभागश्चेति भागद्वयेन विभक्तमस्ति । पूर्वभागे वेङ्कटेश्वरसंस्करणानुसारं प्रायः षट्सहस्रश्लोकाः पञ्चनवत्यध्यायाश्च सन्ति । परन्तु इयम् अध्यायसंख्या विभिन्नपाठानुसारं हस्तलेखेषु विभिद्यते । देवनागरीहस्तलेखे ८५, तेलगुहस्तलेखे ८९, शारदालिपिहस्तलेखे ८५, आड्यारहस्तलेखे शृङ्गेरीहस्तलेखे च ६७ अध्यायाः सन्ति । पुराणस्यास्य उत्तरभागः अधुना न लभ्यते । परन्तु नारदीयपुराणानुसारं वामनपुराणस्य उत्तरभाग एव बृहद्वामनम् इति नाम्ना ख्यायते । अत्र च चतस्रः संहिताः सन्ति- १. माहेश्वरी, २. भागवती, ३, सौरी, ४. गाणेश्वरी चेति । आसु संहितासु प्रत्येकं सहस्रं श्लोकाः सन्ति । तद्यथा -

शृणु तस्योत्तरं भागं वृहद्वामनसंज्ञकम् ।
माहेश्वरी भागवती सौरी गाणेश्वरी तथा ।।
चतस्रः संहिताश्चात्र पृथक् साहस्रसंख्यया ।। ना.पु. १/१०५/१३-१४

अयं चापि वृहद्वामनसंज्ञकः वामनपुराणस्योत्तरभागः सम्प्रति नोपलभ्यते । केवलं वीरमित्रोदयस्य निबन्धग्रन्थेषु, लघुभागवतामृते, श्रीचैतन्यमतानुयायिनां गोस्वामिनां ग्रन्थेषु च पुराणस्यास्य केचन श्लोकाः समुपलभ्यन्ते । रूपगोस्वामिनः उज्ज्वलनीलमणौ मुनीनां गोपीभावप्रसङ्गे, जीवगोस्वामिनः भागवतसन्दर्भे च वृहद्वामनपुराणीयश्लोकानाम् उद्धारः दृश्यते ।

**बोधप्रश्नाः**

१. वामनपुराणं कस्य कल्पस्य प्रसङ्गे केन प्रोक्तम् ?

२. पुराणमिदं कियत्सु भागेषु विभक्तम् ?

३. बृहद्वामनपुराणं किम् ?

**वर्ण्यविषयाः** - पुराणस्यास्य आरम्भः महर्षिपुलस्त्येन देवर्षिनारदस्य प्रश्नानुसारं कृतः । ततः शरद्वर्णनं, दक्षयज्ञे सतीशरीरत्यागः, परस्मिन् जन्मनि पार्वतीनाम्ना हिमालयात् मेनायां सत्याः प्रादुर्भावः, शिवप्राप्तये तस्याः तपश्चर्या, वटुवेशि-शिवेन सह वार्तालापः, शिवेन सह विवाहः, गणेशोत्पत्तिः, कार्तिकेयचरितं, दैत्यराजप्रह्लादस्य नैमिषयात्रा, बदरिकाश्रमे नरनारायणाभ्यां सह तद्युद्धम्, कुरुक्षेत्रस्य तदन्तर्वर्तिनां तीर्थानां च माहात्म्यवर्णनं, सरोमाहात्म्यकीर्त्तनं, दानमहिमा, व्रतानुष्ठानविधिः, शिवस्याऽलङ्कारत्वेन सर्पाणां नामग्रहणं, जम्बूद्वीपीयवर्षाणां वर्णनं, भारतवर्षस्थ-वनपर्वतनद-नदी-जनपदादीनां वर्णनं, कात्यायन्या महिषादिवधः, अन्धकोत्पत्तिः, शुक्राचार्येण सञ्जीवनीविद्याप्रयोगः, मलयपर्वते दानवैः सह इन्द्रस्य युद्धं, देवासुरादीनां वाहनवर्णनं, वामनावतारस्य विस्तृतवर्णनं चेत्यादयः विषयाः वर्णिताः ।

वामनपुराणस्य मुख्यप्रतिपाद्यविषयोऽस्ति वामनावतारकथा । इयं वामनावतारकथा वैदिकी वर्त्तते । ऋग्वेदस्य विष्णुसूक्ते (१/२२/१७,२८) शतपथब्राह्मणे (१/२/५-७) च वामनावतारकथा वर्त्तते । वामनपुराणे या कथा वर्त्तते सा प्रायः ऋग्वेदीय-शतपथब्राह्मणीयकथयोः एकीकरणेन सम्पूर्णतां गता मन्यते । वामनपुराणानुसारं दैत्यराजः बलिः स्वर्गं विजित्य स्वयम् इन्द्रपदं प्राप्य इन्द्रादिदेवान् स्वर्गात् बहिष्कारयामास । ततो देवाः दुःखिताः सन्तः स्वदुःखनिवारणाय भगवन्तं विष्णुम् अवतारग्रहणपूर्वकं दैत्यवधाय प्रार्थयामासुः । भगवान् विष्णुः देवानां प्रार्थनाम् अङ्गीकृत्य अदितिकश्यपयोः पुत्ररूपेण आविर्बभूव । स चानन्तरं बलेः यज्ञशालां गत्वा पादत्रयपरिमितां भूमिं प्रार्थयामास । गुरुणा शुक्राचार्येण पुनः पुनः निवारितोऽपि बलिः आत्मनः दानशीलताहेतोः वटुरूपाय भगवते त्रिपदां भूमिं प्रदत्तवान् । ततो भगवान् वामनो विराड्रूपं धृत्वा एकेन पादेन समग्रं पृथिवीं द्वितीयपादेन अन्तरिक्षं च व्याप्य तृतीयचरणं स्वयं बलिना समर्पिते मस्तके स्थापयामास । एवं वामनः त्रिविक्रममूर्त्तिं धृत्वा बलिं पाताललोकं प्रेषयामास, इन्द्राय स्वर्गं च समर्प्य देवानाम् अभयं कारयामासेति ।

वामनपुराणेऽस्मिन् बहूनि स्तोत्राणि सन्ति । तेषु द्वादशस्तोत्राणि सन्ति विष्णुपरकाणि, अष्टौ सन्ति शिवपरकाणि, चत्वारि देवी-पार्वती-सरस्वती-कात्यायनीनाम्, एकं च सुदर्शनस्य स्तोत्रं वर्त्तते । एवं विषयान्तरैः सह भगवतो वामनस्य चरितवर्णनमेव पुराणस्यास्य मुख्यवर्ण्यविषयोऽस्ति ।

**बोधप्रश्नौ**

१. वैदिकवाङ्मये कुत्र कुत्र वामनचरितं वर्त्तते ?

२. वामनपुराणे विष्णुपरकाणि कति स्तोत्राणि सन्ति ?

**विवेचनम्** – पुराणस्यास्य केवलं पूर्वभागः समुपलभ्यते इति हेतोः पुराणमिदम् अपूर्णमुच्यते । समुपलभ्यमानस्यास्य स्वल्पकायत्वात् पञ्चलक्षणान्तर्गताः सर्वे सर्गादिविषयाः नोपलभ्यन्ते । केवलं मरुताम् उत्पत्तिप्रसङ्गे सप्तमन्वन्तराणां वर्णनं, शुक्रकन्यायाः अरजायाः उपाख्याने च केषाञ्चित् इक्ष्वाकुवंशीयानां राज्ञां प्रसङ्गः समुपलभ्यते । अतः सर्वेषां लक्षणानाम् असमावेशात् उपलब्धे वामनपुराणे पुराणलक्षणं पूर्णतया न संघटते । अतः केषांचिन्मते पुराणमिदं महापुराणं नैवास्ति । तेषां युक्तिः यत् महापुराणेषु पुराणस्यास्य गणनं गरुडपुराणं नैव करोतीति । परन्तु अन्येषां विपश्चितां मते गरुडपुराणे नैव स्यात् परन्तु अन्येषु सर्वेषु पुराणेषु महापुराणत्वेन अस्य गणनात्, अलवरुणिप्रस्तुते सूचीद्वये च महापुराणरूपेण पुराणस्यास्य गणनात् पुराणमिदं नूनमेव महापुराणं स्यादिति ।

वामनपुराणमिदं वैष्णवधर्मप्रतिपादकमस्ति । अत्र बहुलतया वैष्णवधर्मस्य, विष्णुभक्तानां, विष्णुमन्दिरस्य, विष्णुव्रतानां च वर्णनं समुपलभ्यते । पुराणस्यास्य दानेन च विष्णुलोकप्राप्तिर्भवतीति मत्स्यपुराणोल्लेखात् पुराणस्यास्य वैष्णवधर्मप्रतिपादकत्वं सिध्यति । परन्तु वैष्णवधर्मप्रतिपादकत्वेऽपि पुराणमिदं राजसपुराणमिति पद्मपुराणे (उ. ख. २३६/२०), भविष्यपुराणे (प्र. प. २८/११) च स्पष्टनिर्देशोऽस्ति ।

पुराणस्यास्य कालविषये आधुनिकसमालोचकाः कथयन्ति यत् वामनपुराणवर्णितः पार्वती–वटुरूपिशिवयोः संवादः कुमारसम्भववर्णितस्य पार्वती–वटुसंवादस्य प्रायः अर्थतः अक्षरशश्च अनुकरणं बहुषु स्थानेषु करोतीति हेतोः पुराणस्यास्य कालः कालिदासात् परं षष्ठ – नवमशतकमध्ये भवितुमर्हतीति ।

**बोधप्रश्नाः**

१. उपलभ्यमाने वामनपुराणे पुराणलक्षणं कथं न सघटते ?

२. वामनपुराणं राजसपुराणमिति किं किं पुराणं प्रतिपादयति ?

३. पुराणस्य कालविषये आधुनिकसमालोचकाः किं कथयन्ति ?

**१५. कूर्मपुराणम् –**

नारदीयपुराणानुसारं कूर्मपुराणं कूर्मरूपिणा हरिणा लक्ष्मीकल्पीय–विषयाधारेण इन्द्रद्युम्नप्रसङ्गे ऋषिभ्यः प्रोक्तं, पुरुषार्थचतुष्टयमाहात्म्यप्रतिपादकं, १७००० श्लोकविशिष्टं, चतुःसंहितात्मकं चास्ति । परन्तु मत्स्यपुराणमते पुराणमिदं १८००० श्लोकविशिष्टं वर्त्तते । नारदीयानुसारं चतुःसंहिताः यथा – १. ब्राह्मीसंहिता, २. भागवतीसंहिता, ३. सौरीसंहिता, ४. वैष्णवीसंहिता चेति । तत्र प्रथमा ब्राह्मीसंहिता पूर्वार्द्धम् उत्तरार्द्धं चेति भागद्वयेन विभक्ताऽस्ति । द्वितीया भागवतीसंहिता पञ्चपादेषु विभक्तत्वात् पञ्चपादीति कथ्यते । चतुर्थी वैष्णवीसंहिता चतुः पादेषु विभक्तत्वात् चतुष्पादीति निगद्यते । ब्राह्मीसंहितायां ६०००, भागवतीसंहितायां ४०००, सौरीसंहितायां २०००, वैष्णवीसंहितायां च ५०००श्लोकाः, एवं संकलनेन १७००० श्लोकाः पुराणेऽस्मिन् वर्त्तन्ते । परन्तु आसु संहितासु सांप्रतं केवलं प्रथमा ब्राह्मीसंहिता समुपलभ्यते । अन्याः तिस्रः नैव दृश्यन्ते । ब्राह्मीसंहितायाः पूर्वार्द्धे ५३, उत्तरार्द्धे च ४६, संकलनया ९९ अध्यायाः ६०००श्लोकाश्च सन्ति । पुराणमिदं भगवता कूर्मरूपिणा हरिणा इन्द्रिद्युम्नाय प्रोक्तत्वात् अस्य नाम कूर्मपुराणमिति –

> एतत् पुराणं सकलं भाषितं कूर्मरूपिणा ।
> साक्षाद्देवाधिदेवेन विष्णुना विश्वयोनिना ।। कू. पु. उत्तरार्द्धे ४६/१२२

**बोधप्रश्नाः**

१. कूर्मपुराणं कस्य कल्पस्य प्रसङ्गे उक्तम् ?

२. पुराणेऽस्मिन् किंनामिकाः संहिताः सन्ति ?

३. सांप्रतं समुपलब्धं कूर्मपुराणं किंभूतमस्ति ?

**वर्ण्यविषयाः** – पुराणस्यास्य पूर्वभागे पुराणानाम् उपक्रमः, लक्ष्मीन्द्रद्युम्नसंवादः, ऋषिविष्णुसंवादः, वर्णाश्रमाचारः, सृष्टिप्रकरणं, पार्वतीतपस्या, पार्वतीसहस्रनामस्तोत्रमिति विषयाः विद्यन्ते । तथा च भृगुवंशाख्यानं, स्वायम्भुववर्णनं, दक्षयज्ञध्वंसः, व्यासपाण्डवसंवादः, युगधर्मनिरूपणं, काशीप्रयागमाहात्म्यं च विस्तरेण प्रदत्तमस्ति । अस्य उत्तरभागे ईश्वरगीता व्यासगीता चेति गीताद्वयं वर्त्तते । तत्र ईश्वरगीतायां भगवतः शिवस्य स्वरूपाधिगमाय आध्यात्मिकज्ञानस्योपायत्वं प्रतिपादितम् । अत्र शैवदर्शनप्रतिपाद्यतत्त्वानां विवेचनपूर्वकं पाशुपतयोगस्य विशदविवरणं प्रदत्तमस्ति । सदाचारस्य विस्तृतम् उपस्थापनम् अत्र विहितमस्ति । व्यासगीतायां चतुर्णां वर्णानाम् आश्रमाणां च धर्माः प्रदर्शिताः । एवं पुराणमिदं स्वोपदेशेन कल्याणमार्गप्रदर्शकं मन्यते ।

पुराणेऽत्र भगवान् सदाशिव एव साक्षात्परमात्मरूपेण प्रतिपादितोऽस्ति । स एव सर्वजगत्सृष्टिकृत्, पालनकृत्, संहारकृत् च वर्त्तते । स एव सृष्टेरादौ ब्रह्माणं सृष्ट्वा तस्मै वेदान् दत्तवान् । तस्य च एका सनातनी मूर्त्तिरस्ति भगवान् विष्णुः । पुराणेऽस्मिन् ब्रह्म-विष्णु-महेशानां मध्ये भेदो नैव स्वीक्रियते; यतो हि एकमेव परंब्रह्म जगत्सृष्टि-स्थिति-लयार्थं रूपत्रयं धारयति ।

एतत्पुराणानुसारं पुण्यक्षेत्राभिगमनं तीर्थाभिगमनञ्च सर्वपापविनाशकं मन्यते । परन्तु स्वधर्मपालनपूर्वकं तीर्थं सेवितव्यमिति उपदिशति –

> यः स्वधर्मान् परित्यज्य तीर्थसेवां करोति हि ।
> न तस्य फलते तीर्थमिह लोके परत्र च ।। कू. पु. उ. ४४/२०

पुराणेऽस्मिन् देवोद्याने देवायतने च मूत्र-पुरीषत्यागस्य निन्दनपूर्वकं निषेधः कृतः ।

तत्पापशुद्ध्यर्थं चान्द्रायणव्रतानुष्ठानस्य मूत्रत्यागेन्द्रियकर्तनस्य च विधानं वर्त्तते –

देवोद्यानेषु यः कुर्याद् मूत्रोच्चारं सकृद्द्विजः ।
छिन्द्याच्छिश्नं विशुद्ध्यर्थञ्चरेच्चान्द्रायणं व्रतम् ।। तत्रैव ३४/८८

ईश्वरस्य सदाशिवस्य रूपभेदौ वर्त्तेते नारायण–पितामहौ इति स्वयं विष्णुना ब्रह्मणः समीपे प्रकाशितम् (कू.पु. पूवार्द्धे ९/४०) । कूर्मपुराणेऽस्मिन् महेश्वरस्य शक्तिः चतुर्विधा कथिताऽस्ति – १. शान्तिः, २. विद्या, ३. प्रतिष्ठा, ४. निवृत्तिश्चेति । एता एव तन्त्रशास्त्रे कला इति कथ्यन्ते । एताभिः शक्तिभिश्च भगवतः चतुर्व्यूहत्वं कथ्यते –

शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः स्मृताः ।
चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः ।। तत्रैव १२/१८

शिवस्य चतुर्व्यूहत्वं पुराणेऽत्र यथा वर्णितं तथा विष्णोरपि चतुर्व्यूहत्वं प्रतिपादितं यद् विष्णोः प्रथमा ज्ञानरूपा मूर्त्तिरस्ति वासुदेवनाम्नी, द्वितीया तामसी मूर्त्तिः कालनाम्नी, तृतीया सत्त्वगुणाधिका मूर्त्तिः प्रद्युम्ननाम्नी, चतुर्थी च रजोमयी मूर्त्तिरस्ति ब्रह्मनाम्नी (कू. पु. उत्तरार्द्धे ५१/३९–४२)

एवं कूर्मपुराणेऽस्मिन् मुख्यतः शिवस्वरूपमाहात्म्यवर्णने कृतेऽपि त्रयाणां देवानाम् अभेदः प्रतिपादितोऽस्ति ।

**कालविवेचनम्** – पुराणस्यास्य बहूनि उद्धरणानि निबन्धग्रन्थेषु नोपलभ्यन्ते । तथापि पाशुपतमतप्रतिपादनाधारेण पुराणस्यास्य आविर्भावकालः षष्ठ–सप्तमशताब्द्यौ अनुमीयेते; यतो हि तदैव उत्तराभारते राजपुतनायां मथुरामण्डले च पाशुपतमतस्य प्रचलनमासीत् इति ।

**बोधप्रश्नाः**

१. पुराणस्यास्य उत्तरभागे किं वर्त्तते ?

२. पुराणस्यास्य मुख्यदेवः कः ?

३. तीर्थसेवाविषये कूर्मपुराणस्य विशेषमतं किम् ?

४. शिवस्य चतुर्व्यूहत्वेन किं किं कल्प्यते ?

५. पुराणस्यास्य कालः कः स्यात् ?

**चतुर्थांऽशसारः** – अंशेऽस्मिन् चतुर्णां पुराणानां परिचयः प्रदत्तः । प्रथमं वराहपुराणस्य परिचयप्रसङ्गे तस्य मानवकल्पप्रासङ्गिकत्वं, महावराहमाहात्म्यप्रतिपादकत्वं, चतुर्विंशतिसहस्रश्लोक-युतत्वं, पूर्वोत्तरभेदेन भागद्वयविभक्तत्वं च प्रकाशितम् । आधुनिकसमीक्षकाणां मतानुसारं चास्य पुराणस्य नवम-दशमशतकोत्पन्नत्वं प्रतिपादिम् । अनन्तरं च स्कन्दपुराणस्य परिचयार्थं तस्य तत्पुरुषकल्पप्रसङ्गे स्कन्दप्रोक्तत्वम्, एकाशीतिसहस्रश्लोकात्मकत्वं, सप्तखण्डविभक्तत्वं च प्रतिपादितम् । स्वयं स्कन्दपुराणस्य सूतसंहितोक्तं पञ्चसंहितात्मकत्वमपि प्रतिपादितम् । बहुलतया तीर्थ-क्षेत्रादिस्वरूपप्रतिपादकत्वात् पुराणस्यास्य भूगोलज्ञानप्रकाशकत्वं वैशिष्ट्यमावहति । पुराणस्यास्य कालः सप्तमशतकात् पूर्वमिति निर्द्धारितम् । ततः परं वामनपुराणस्य परिचयार्थं तस्य कूर्मकल्पप्रसङ्गे चतुर्मुखब्रह्मप्रोक्तत्वं, दशसहस्रश्लोकान्वितत्वं, भागद्वयविभक्तत्वं च प्रदर्शितम् । अधुनोपलभ्यमानं वामनपुराणं केवलं मूलवामनपुराणस्य पूर्वभाग एवास्ति । अस्य उत्तरभागः नोपलभ्यते । परन्तु बृहद्वामनममेवास्य पुराणस्योत्तरभाग इति नारदीयपुराणस्य मतम् । पुराणस्यास्य कालः षष्ठ-नवमशतकमध्ये स्यादिति समीक्षकाणां मतम् । अनन्तरं कूर्मपुराणस्य परिचयप्रसङ्गे कथितं यत् लक्ष्मीकल्पीयविषयाधारेण भगवता कूर्मेण इन्द्रद्युम्नप्रसङ्गे पुराणमिदम् ऋषिभ्यः प्रोक्तं, सप्त-दशसहस्रश्लोकात्मकं, चतुःसंहितासु विभक्तं चेति । परन्तु सांप्रतं केवलं ब्राह्मीसंहिता प्राप्यते यत्रैव महेश्वरशिवस्य महिमा विस्तरेण प्रतिपाद्यते । अस्य च पुराणस्य कालः षष्ठ-सप्तमशताब्द्यात्मकः अनुमीयते ।

**आदर्शप्रश्नाः**

**क) निबन्धात्मकप्रश्नाः** २०/१५

१. वराहपुराणस्य पूर्णाङ्गपरिचयं समुपस्थापयत ।

२. स्कन्दपुराणस्य स्वरूपं संप्रकाश्य संक्षेपतः तद्वर्ण्यविषयान् प्रकाशयत ।

**ख) विश्लेषणात्मकप्रश्नाः** १२/१०

१. वामनपुराणस्य स्वरूपं विविच्य तद्वर्ण्यविषयाः प्रकाश्यन्ताम् ।

२. कूर्मपुराणस्य स्वरूपं वर्ण्यविषयांश्च समुपस्थापयत ।

३. भारतस्य भौगोलिकज्ञानाय स्कन्दपुराणस्य भूमिकां विवेचयत ।

**ग) लघूत्तरीयाः प्रश्नाः** ५

१. स्कन्दपुराणस्य कालं निरूपयत ।

२. वामनपुराणस्य महापुराणत्वं प्रतिपाद्यताम् ।

३. कूर्मपुराणप्रतिपादितं शिव-ब्रह्म-विष्णूनाम् ऐक्यं प्रतिपादयत ।

४. वामनपुराण-कूर्मपुराणयोः कालं विचारयत ।

**घ) एकाङ्कप्रश्नाः** १

१. वराहपुराणं केन कुत्र कथितम् ?

२. वराहपुराणस्य कालनिर्द्धारणे कः आधारः ?

३. नारदीयपुराणमते स्कन्दपुराणे कियन्तः श्लोकाः सन्ति ?

४. सप्तखण्डात्मके स्कन्दपुराणे कियन्तः अध्यायाः वर्त्तन्ते ?

५. पुरुषोत्तमक्षेत्रमाहात्म्यं स्कन्दपुराणे कुत्र वर्त्तते ?

६. स्कन्दपुराणस्य रचनाकालः कः स्यात् ?

७. वामनपुराणस्य पूर्वभागे कियन्तः श्लोकाः अध्यायाश्च सन्ति ?

८. वामनपुराणस्य नाम महापुराणत्वेन किं पुराणं नैव स्वीकरोति ?

९. कूर्मपुराणं कः केभ्यः कथयति ?

१०. विष्णोः चतुर्व्यूहाः के ?

**उत्तराणि –**

१. भगवता विष्णुना व्यासेन वा पृथिवीदेवीसमक्षम्,

२. निबन्धग्रन्थाः, रामानुजीयवैष्णवमतञ्च,

३. एकाशीतिसहस्राणि,

४. १६७१ अध्यायाः,

५. वैष्णवखण्डे,

६. सप्तमशतकात् पूर्वम्,

७. षट्सहस्राणिश्लोकाः, पञ्चनवतिः अध्यायाश्च,

८. गरुडपुराणम्,

९. कूर्मरूपी हरिः ऋषिभ्यः कथयति,

१०. वासुदेवः, कालः, प्रद्युम्नः, ब्रह्मा च ।

❖❖❖

# पञ्चमपत्रम्

## क-विभागः

## पञ्चमोंऽशः (मत्स्यपुराणम्, गरुडपुराणम्, ब्रह्माण्डपुराणञ्च)

**प्रस्तावना** – पूर्वसमुपस्थापितेषु चतुर्षु अंशेषु ब्रह्मपुराणादारभ्य कूर्मपुराणपर्यन्तं पञ्चदशपुराणानां परिचयोऽस्माभिः संप्राप्तः । अधुना पञ्चमेंऽशेऽस्मिन् अवशिष्टानां मात्स्य-गारुड-ब्रह्माण्डाख्यानां त्रयाणां पुराणानां परिचयः प्राप्स्यते । प्रथमतः मत्स्यपुराणस्य परिचयप्रसङ्गे तस्य वक्तृ-श्रोतृ-श्लोकाऽध्यायसंख्या-खण्डभागादिविभाजनात्मकं स्वरूपं प्रस्तोष्यते । ततश्च तद्वर्ण्यविषयोपस्थापनं, स्थानकालादिविवेचनं च करिष्यते । तदनन्तरं गरुडपुराणस्याऽपि मात्स्यवत् स्वरूपादिकं समुपस्थापयिष्यते । अन्ते च अन्तिमस्य ब्रह्माण्डपुराणस्य परिचयोऽपि पूर्वोक्त-स्वरूपादिविवेचनमाध्यमेन प्रदास्यते ।

**उद्देश्यम्** - मात्स्यादिपुराणानां परिचयोऽस्माभिः निम्नोक्तबिन्दूनामाधारेण प्राप्स्यते । तद्बिन्दवो यथा – • मत्स्यपुराणस्य स्वरूपम्

- तद्वर्ण्यविषयाः
- तत्स्थानकालादिसंभावना
- गरुडपुराणस्य स्वरूपम्
- तद्वर्ण्यविषयाः
- तस्य विविधविद्याप्रकाशकत्वं
- तत्स्थानकालादिविवेचनम्
- ब्रह्माण्डपुराणस्य स्वरूपम् वर्ण्यविषयाः स्थानकालादिसमीक्षणं च ।

**१६. मत्स्यपुराणम्** -

नारदीयपुराणानुसारं मत्स्यपुराणं भगवता वेदव्यासेन नरसिंहवर्णनम् उपक्रम्य सप्तकल्पप्रसङ्गाधारेण प्रोक्तं चतुर्दशसहस्रश्लोकविशिष्टं पुराणमस्ति । किन्तु स्वयं मत्स्यपुराणम् आत्मानं मत्स्यावतारेण भगवता मनवे प्रोक्तं, नरसिंहवर्णनप्रसङ्गे सप्तकल्पविषयप्रतिपादकं, चतुर्दशसहस्रश्लोकात्मकं च कथयति । अत्र १४०००श्लोकाः २९०अध्यायाश्च सन्तीति

स्कन्दपुराणीयरेवामाहात्म्यं श्रीमद्भागवतं ब्रह्मवैवर्त्तपुराणञ्च प्रतिपादयन्ति ।

**वर्ण्यविषयाः** – पुराणेऽस्मिन् मनु–मत्स्यसंवादप्रसङ्गे प्रलयविषयः, ब्रह्मकृतमानसीसृष्टिः, मैथुनीसृष्टिः, सरस्वतीविषयक–ब्रह्मचरित्रम्, पृथुचरितं, सोमसूर्यवंशवर्णनम्, ययातिचरितं, पूर्तकर्म, व्रतविधानं, दानफलप्रतिपादनं, वन–पर्वतादीनां वर्णनं, शाकद्वीपादिवर्णनं, युगविवरणं, तारकोपाख्यानं, नर्मदामाहात्म्यं, सावित्रीचरितं, राजधर्मनिरूपणं, शकुनसामुद्रिकज्ञानं, गृहनिर्माणं, प्रतिमानिर्माणमिति बहुविषयाणां प्रतिपादनं सम्यक्तया कृतं वर्त्तते ।

पुराणस्यास्य ५३अध्याये पुराणानां विषयानुक्रमणिका प्रस्तुताऽस्ति । अत्र सर्वेषां पुराणानां स्वरूपं, श्लोकसंख्या, अन्तर्विभाजनं, संक्षिप्तविषयवस्तु, श्रवण–पाठ–दानादिमाहात्म्यञ्च प्रदत्तमस्ति । १९५–२०२अध्यायेषु ऋषिवंशानां विस्तृतवर्णनं वर्त्तते । अत्र पितॄणां वंशवर्णनमपि विस्तरेण प्रदत्तम् । वैराजपितृवंशस्यवर्णनं त्रयोदशेऽध्याये, अग्निष्वात्तपितॄणां वंशवर्णनं चतुर्दशेऽध्याये, बर्हिषत्पितॄणां च वंशवर्णनं पञ्चदशेऽध्याये विशेषतया वर्त्तते । श्राद्धकल्पस्य विवेचनं १६–२३अध्यायेषु कृतम् । राजवंशवर्णनं विशेषतः सोमवंशवर्णनमपि विस्तरेणाऽत्र कृतम् । तत्प्रसङ्गे ययातिचरितं २७–४२अध्यायेषु बहुविस्तरेण वर्णितं वर्त्तते ।

विभिन्नप्रतिमानिर्माणविधानं २५७–२७०अध्यायेषु प्रामाणिकतया प्रदर्शितम् । प्रतिमानां निर्माणं तालमानानुसारं वैज्ञानिकपद्धत्या विहितमस्ति पुराणेऽस्मिन् । अत्र शिवप्रतिमानां निर्माणं विशदतया यथा प्रदर्शितं तथा नान्यासां प्रतिमानाम् । प्रतिमानां प्रतिष्ठा, तत्पीठ–मन्दिरादीनां च प्रतिष्ठा पुराणेऽत्र विधिपूर्वकं समुपदिष्टाऽस्ति ।

राजधर्मस्य वर्णनं पुराणेऽस्मिन् २१५–२४३अध्यायेषु कृतं दृश्यते । अस्मिन् प्रसङ्गे दैव–पुरुषकार–साम–दाम–भेद–दण्ड–दुर्ग–यात्रा–सहायसम्पत्ति–तुलादानादिविषयाः पुराणस्यास्य राजनैतिकमहत्त्वं प्रतिपादयन्ति ।

तदानीन्तनराजनैतिकस्थितेः अनुध्यानाद् ज्ञायते यत् तदा राजा राजधर्मं पालयित्वा सर्वसम्मत्या एव शासनं कुर्वन् आसीत् । तदा राज्यं सप्ताङ्गविशिष्टम् आसीत् । राज्याऽङ्गरूपेण सचिवः, सुहृद्वर्गः, कोषः, राष्ट्रं, बलं, दुर्गं, प्रजानायकश्चेति सप्ततत्त्वानि गृह्यन्ते । राजा एतेषां सप्ताङ्गानां सहायतया राज्यशासनं करोति स्म । प्रशासनिक–नियमप्रणयने न केवलं राज्ञः अधिकारः, अपि तु

नियमप्रणयनसमितेः अधिकारः आसीत् । एवं सर्वेषां सम्मत्या राज्यशासनात् हेतोः प्रजाः सुखेनासन् ।

**बोधप्रश्नाः**

१. मत्स्यपुराणे कति श्लोकाः अध्यायाश्च सन्ति ?

२. पुराणेऽस्मिन् राज्यं कियत् अङ्गविशिष्टं वर्णितम् ?

३. कस्य सोमवंशीयनृपस्य चरितं विस्तरेणाऽत्र वर्णितम् ?

..

शत्रोः सकाशात् राज्यस्य सुरक्षार्थं युद्धस्य अवश्यंभावित्वं स्वीक्रियते । अतः तदानीं युद्धकौशलमपि अत्युन्नतमासीत् । देवासुरसंग्रामे रथाऽश्वगजपदातीनां विशेषतः आकाशगामिरथानां बहुलव्यवहारः आसीत् । किञ्च अद्भुत-वाणपाशादीनाम् अस्त्राणां प्रयोगः आधुनिक-परमाणुवम्-प्रयोगादपि उन्नततरः आसीत् । केवलं धनुर्विद्यायाः प्रयोगः युद्धे नैव कृतः आसीत् । अपि तु खड्ग-गदा-रथचक्र-परिघ-मुसल-वज्र-पाश-दण्डादीनामपि प्रयोगः आसीत् । बाहुयुद्धस्यापि बहुलप्रचलनं तदानीम् आसीत् । राज्यरक्षाविषये दुर्गस्यापि बहुमहत्त्वम् आसीत् । मयदानवरचितस्य त्रिपुरदुर्गस्य दुर्गमता दुर्गस्य महान्तम् उपयोगं प्रमाणयति । एवं तदानीन्तन-राजनैतिकी स्थितिः सुस्थसमाजस्य चित्रं समुपस्थापयति ।

तदानीं ब्राह्मणानामेव सुमहत्त्वं राजनैतिकक्षेत्रे, सामाजिकक्षेत्रे, धार्मिकक्षेत्रे च आसीदिति मात्स्यवर्णनाद् ज्ञायते । वास्तुकलादिवैज्ञानिकक्षेत्रेष्वपि ब्राह्मणानां महत्त्वम् अनुभूतम् आसीत् । राज्यशासनक्षेत्रे ब्राह्मणाः राजपुरोहितरूपेण सभासद्रूपेण च प्रत्यक्षतया भूमिकां निर्वहन्तः आसन् । पुरोहितान् ब्राह्मणांश्च पृष्ट्वैव राजा शासनादिविषये कमपि निर्णयं करोति स्म । तथा च प्रजाविरोधिनं कुमार्गगामिनं कुशासकं राज्याधिकारात् वहिष्कर्तुं ब्राह्मणा एव अधिकारिण आसन् । धार्मिकक्षेत्रेऽपि

ब्राह्मणः मुख्यः आसीत् । तस्य प्रेरणया निर्देशेन च समाजे न केवलं राजा, अपि तु प्रजाः एव यज्ञादिधार्मिककार्येषु प्रवृत्ताः आसन् । शत्रुपीडा-ग्रहपीडादिदुःखनिवारणाय धार्मिकविधीनां व्यवस्थया ते सामाजिकीं सुस्थतां निर्वाहयन्तः आसन् ।

मत्स्यपुराणं पुरुषार्थसंपादनाय महान्तम् उपदेशं दत्त्वा पुरुषार्थसम्पादनेन मानुषजन्मनः साफल्यमुद्घोषयति । पुत्रः पितुराज्ञां पालयित्वा तदनुग्रहं प्राप्नोति तद्विपरीतकारी च पुत्र इति नैव कथ्यते । पुत्रेण श्राद्धकाले पितॄन् उद्दिश्य श्रद्धापूर्वकं यत् श्राद्धं दीयते तदेव पितॄणां तृप्तिकारकं भवति ।

कालगणनाप्रसङ्गे विष्णोः सनातनत्वं प्रतिपादितं पुराणेऽस्मिन् । ब्रह्मणः शतवर्षैः शिवस्य दिनमेकं भवति । शिवस्य शतवर्षैः विष्णोः एकनिमेषो भवति । तस्य जागरणमेव सृष्टिः शयनञ्च प्रलय इति कथ्यते -

ब्रह्मसंवत्सरशतादेकाहं शैवमुच्यते ।
शिववर्षशतादेकं निमेषं वैष्णवं विदुः ।।
यदा स विष्णुर्जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपीति शान्तात्मा तदा सर्वं निमीलति ।। म. पु. २८९/२२-२३

पतिव्रतानारीणां कृते बहुसम्मानबोधः पुराणेऽत्र प्रदर्शितः । तासां वाक्यं कदाचिदपि वृथा न भवतीति हेतोः तासाम् आदरः सर्वैः करणीय इति (म. पु. २१३/२८) ।

एवं वर्ण्यविषयाणां प्राचीनतया व्यापकतया च पुराणेषु मत्स्यपुराणस्यास्य महत्त्वपूर्णस्थानं वर्त्तते इति ।

**बोधप्रश्नाः**

१. मत्स्यपुराणे कस्य महत्त्वं सर्वेषु सामाजिकादिक्षेत्रेषु स्वीकृतम् ?

२. मानवजीवनस्य साफल्यं कुत्र वर्त्तते ?

३. पतिव्रतानां नारीणां समादरः कथं कर्तव्यत्वेन उपदिष्टः ?

**स्थानकालविवेचनम्** – पुराणस्यास्य स्थानकालसम्बन्धे समीक्षकाणां बहुमतानि प्राप्यन्ते । पार्जिटरमहोदयः पुराणस्यास्य रचनास्थानम् आन्ध्रप्रदेशं कल्पयति; यतो हि पुराणेऽस्मिन् कलिराजवंशवर्णनम् आन्ध्रनृपति–यज्ञश्रीपर्यन्तं विहितम् । परन्तु अन्येषां केषाञ्चित् समीक्षकाणां मते नर्मदातटप्रदेश एवास्य पुराणस्य रचनास्थानं स्यात्; यतो हि प्रलयकालेऽपि स्थितानां व्यक्तीनां वस्तूनां च मध्ये नर्मदायाः गणनात् तत्र ग्रन्थकारस्य विशेषः पक्षपातः वर्त्तते ।

मत्स्यपुराणविषयकाः बहुश्लोकाः मनुस्मृतौ याज्ञवल्क्यस्मृतौ च समुपलभ्यन्ते । अत्र मत्स्यपुराणे संस्कृतसाहित्यस्य बहुग्रन्थानां ग्रन्थकाराणाञ्च स्पष्टनिर्देशः वर्त्तते । कालिदासस्य विक्रमोर्वशीयनाटकस्य मत्स्यपुराणीय–उर्वश्युपाख्यानेन सह बहुसाम्यं वर्त्तते । परन्तु घटनासाम्यात् एतत् निश्चयेन कथयितुं न शक्यते यत् किं पूर्ववर्ति किं च परवर्त्तीति । तथापि एतदेवानुमीयते यत् गुप्तकालीन–कालिदासः प्रायशः विक्रमोर्वशीयकथावस्तु मत्स्यपुराणाधारेण समुपस्थापयामासेति । अतः कालिदासकालात् पूर्वं द्वितीय–चतुर्थशतकमध्ये पुराणस्यास्य आविर्भावः स्यादिति ।

**बोधप्रश्नौ**

१. पार्जिटरमहोदयः मत्स्यपुराणस्य रचनास्थानं किं मन्यते ?

२. मत्स्यपुराणं कस्मिन् शतके आविर्भूतं स्यात् ?

**१७. गरुडपुराणम्** –

मत्स्यपुराणानुसारं गरुडपुराणं गरुडकल्पस्योद्भवप्रसङ्गे भगवता विष्णुना प्रोक्तं, विश्वाण्डविषयकम्, अष्टादशसहस्रश्लोकात्मकं च वर्त्तते । नारदीयपुराणमते तु पक्षिराजगरुडस्य प्रश्नानुसारं भगवता विष्णुना गरुडकल्पप्रसङ्गे गरुडायैव प्रोक्तम्, ऊनविंशतिसहस्रश्लोकात्मकं पुराणमेव गरुडपुराणमिति कथ्यते । एवं केवलं श्लोकसंख्यायामेव मत्स्य–नारदपुराणमतयोर्मध्ये मतवैषम्यं वर्त्तते । अत्र पूर्वखण्डः उत्तरखण्डश्चेति खण्डद्वयमस्ति । पूर्वखण्डे २२९ उत्तरखण्डे च ३५ अध्यायाः

सन्ति । अयम् उत्तरखण्डः प्रेतकल्प इति नाम्नाऽपि कथ्यते – ''अथास्यैवोत्तरः खण्डः प्रेतकल्पः पुरोदितः ।'' उ. ख. १/१

**वर्ण्यविषयाः** – गरुडपुराणस्य पूर्वखण्डे पुराणोपक्रमानन्तरं संक्षेपतः सर्गवर्णनं, सूर्यादिपूजनविधिः, दीक्षाविधिः, नवव्यूहार्चनविधिः, विष्णुपूजाविधानं, विष्णुसहस्रनामकीर्तनं, विष्णुध्यानं, सूर्यपूजाविधानं, शिवपूजनं, गोपालपूजनं, दुर्गार्चनं, संध्योपासनाविधिः, वास्तुमानं, प्रासादलक्षणं, सर्वदेवप्रतिष्ठा, अष्टाङ्गयोगः, दानधर्मः, प्रायश्चित्तविधिः, ज्योतिःशास्त्रं, सामुद्रिक-स्वर-रत्नादिशास्त्राणि, तीर्थमाहात्म्यं, गयामाहात्म्यं, मन्वन्तराख्यानं, वर्णधर्माः, द्रव्यशुद्धिः, श्राद्धं, विनायकपूजनं, ग्रहयज्ञः, आश्रमधर्माः, प्रेताशौचं, नीतिसारः, सूर्य-सोमवंशौ, हरेः अवताराः, रामायण-हरिवंश-महाभारतसारः, आयुर्वेदशास्त्रं, छन्दःशास्त्रं, सदाचारः, स्नानविधिः, तर्पणं, वैश्वदेवः, प्रलयः, युगधर्मः, विष्णुभक्तिः, नरसिंहस्तवः, वेदान्तसांख्यसिद्धान्तः गीतासारश्चेति विषयाः प्रतिपादिताः सन्ति । पूर्वोक्तेषु विषयेषु रत्नपरीक्षा, नीतिसारः, आयुर्वेदशास्त्रं, छन्दश्शास्त्रं, सांख्यवेदान्तसिद्धान्तः, गीतासारश्चेति विषयाः प्रमुखाः सन्ति । ६९-८० अध्यायेषु मुक्ता-वैडूर्य-पुष्पराग-विद्रुम-स्फटिक-पद्मराग-मरकत-इन्द्रनीलादीनां रत्नानां परीक्षणविधिः प्रदर्शितोऽस्ति । १०८-११५अध्यायेषु नीतिसारस्य उपदेशः प्रदत्तः । नीतिसारस्य कतिपये दृष्टान्ता यथा –

परदारं परार्थञ्च परिहासं परस्त्रिया ।
परवेश्मनि वासञ्च न कुर्बीत कदाचन ।। ग.पु. १०८/१३

स्वधर्मकर्मार्जितजीवितानां शास्त्रेषु दारेषु सदा रतानाम् ।
जितेन्द्रियाणामतिथिप्रियाणां गृहेऽपि मोक्षः पुरुषोत्तमानाम् ।। तत्रैव १०९/४३

वनेऽपि दोषाः प्रभवन्ति रागिणां गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्त्तते निवृत्तरागस्य गृहं तपोवनम् ।। तत्रैव ११३/९

नद्यश्च नार्यश्च समस्वभावाः स्वतन्त्रभावे गमनादिकं च ।
तोयैश्चदोषैश्च निपातयन्ति नद्यो हि कूलानि कुलानि नार्यः ।। तत्रैव १०९/३८

अनन्तरं १४६-१९० अध्यायेषु आयुर्वेदचिकित्सायाः रोगनिदानस्य च विवेचनं विहितम् । विभिन्नानां रोगाणां निराकरणाय समुचितौषधानां व्यवस्था प्रदत्ता । पशुचिकित्साविधानमपि सम्यक्

उपदिष्टम् । २११-२१६ अध्यायेषु छन्दःशास्त्रस्य विचारः समुपस्थापितः । तथा च २३०-२४३अध्यायेषु सांख्य-वेदान्तदर्शनसिद्धान्तानां निरूपणं गीतायाः फलकीर्त्तनं च कृतं वर्त्तते ।

पुराणस्यास्य उत्तरखण्डे प्रेतकल्पे भिन्नभिन्नयोनीनां गतिकारणं, यमलोकमार्गवर्णनं, षोडशश्राद्धफलं, प्रेतपीडानिर्देशः, प्रेतचिह्ननिरूपणं, प्रेतकृत्यविचारः, सपिण्डीकरणं, प्रेतत्वमोक्षणोपायः, यमलोकविस्तारः, मृत्योः पूर्व-पश्चात्क्रियाः, वृषोत्सर्गमाहात्म्यम्, अपमृत्यौ क्रियाः, कर्मविपाकः, विमुक्तये विष्णुध्यानञ्चेति विषयाः समुपस्थापिताः ।

एवं बहुविधविषयाणां विद्यानाञ्च समुपस्थापनात् अग्निपुराणवद् गरुडपुराणमपि पौराणिककोशः इति कथ्यते ।

**बोधप्रश्नाः**

१. मत्स्यपुराणमते गरुडपुराणे कति श्लोकाः सन्ति ?

२. गरुडपुराणे श्रोता कः ?

३. पुराणस्यास्य उत्तरखण्डस्य नामान्तरं किम् ?

४. नीतिसारः कुत्र वर्त्तते ?

**स्थानकालविवेचनम्** - डॉ. हाजरामहोदयानां मते पुराणमिदं मिथिलाप्रदेशे आविर्भूतं स्यात् । अस्य च रचनाकालः नवमशताब्दी स्यात् । गरुडपुराणे यत् आयुर्वेदशास्त्रं संकलितं तदेव वाग्भट्टस्य अष्टाङ्गहृदयाधारेण कृतम् । वाग्भट्टस्य कालः अष्टम-नवमशताब्दीमध्यभागः स्वीक्रियते । अतः गरुडपुराणस्यापि कालः नवमशताब्दी स्यात् । किञ्च वल्लालसेनेन दानसागरग्रन्थे पुराणस्यास्य तार्क्ष्यपुराणमिति नामोल्लेखः कृतः । अलवरुणिनाऽपि पुराणस्यास्य नामोल्लेखः कृतः । भोजराजोऽपि मुक्तिकल्पतरुग्रन्थे गरुडपुराणस्य श्लोकान् उद्धृतवान् । अतः पुराणमिदं दशमशताब्द्याः परवर्त्ति नैव स्यात् अपि तु नवमशतकीयं स्यादिति ।

**बोधप्रश्नाः**

१. पुराणमिदं कुत्र आविर्भूतं स्यात् ?

२. गरुडपुराणीयाऽयुर्वेदशास्त्रं कस्य ग्रन्थस्याधारेण संकलितम् ?

३. पुराणमिदं कस्यां शताब्द्यां रचितं स्यात् ?

..

**१८. ब्रह्माण्डपुराणम्** –

मत्स्यपुराणानुसारं ब्रह्माण्डपुराणं ब्रह्मप्रोक्तं, भविष्यकल्पवृत्तान्त-प्रकाशकं, द्विशताधिक-द्वादशसहस्र(१२२००) श्लोकविशिष्टं च वर्त्तते । परन्तु नारदीयपुराणमते भविष्यकल्पस्य कथामाश्रित्य समस्तब्रह्माण्डनिरूपणं यत्र १२०००श्लोकैः कृतमस्ति तदेव ब्रह्माण्डपुराणमिति । श्रीमद्भागवत-ब्रह्मवैवर्त्तपुराणयोरपि ब्रह्माण्डपुराणं द्वादशसहस्रश्लोकविशिष्टम् इति कथितम् । अत्र चत्वारः पादाः – १. प्रक्रियापादः, २. अनुषङ्गपादः, ३. उपोद्घातपादः, ४. उपसंहारपादश्च सन्ति । अत्र प्रथमद्वितीयपादौ पूर्वभागः, तृतीयपादः मध्यमभागः, चतुर्थपादश्च उत्तरभाग इत्यपि कथ्यते (ना.पु. १०९/१-३) । पुराणेऽस्मिन् १६१अध्यायाः सन्ति । ब्रह्माण्डस्य भौगोलिकवर्णनात् हेतोः पुराणस्यास्य नाम ब्रह्माण्डमिति शिवपुराणस्य मतम् –

ब्रह्माण्डचरितोक्तत्वाद् ब्रह्माण्डं परिकीर्त्तितम् ।
ब्रह्माण्डं चाति पुण्योऽयं पुराणानामनुक्रमः ।। शि.पु. उ.सं. ११४४/१४३

**वर्ण्यविषयाः** – ब्रह्माण्डपुराणस्य पूर्वभागे प्रक्रियापादे नैमिषारण्यप्रसङ्गः, हिरण्यगर्भोत्पत्तिः, लोककल्पनश्चेति विषयाः समुपस्थापिताः । ततश्च अनुषङ्गपादे कल्प-मन्वन्तरविवरणं, ब्रह्मकृतमानससृष्टिः, रुद्रोत्पत्तिः, ऋषिसर्गः, कालस्वरूपं, प्रियव्रतकृत-द्वीपसमुद्रविभागः, भारतादिवर्षवर्णनं, जम्ब्वादिद्वीपवर्णनम्, अधोलोकवर्णनम्, ऊद्ध्वर्लोकवर्णनं, ग्रहसञ्चारः, सूर्यव्यूहकथनं, शिवस्य नीलकण्ठत्वकथनं, युगतत्त्वम्, ऋषिप्रवरवर्णनं, वेदविस्तारः, पृथिवीदोहनं चेति विषयाः वर्णिताः ।

तदनन्तरं मध्यभागे उपोद्घातपादे सप्तर्षिविवरणं, देवादिसमुद्भवः, मरुतामुत्पत्तिः, कश्यपवंशवर्णनम्, ऋषिवंशनिरूपणं, पितृकल्पकथनं, श्राद्धकल्पः, वैवस्वतमनोः आविर्भावः, तत्कृतसृष्टिः, इक्ष्वाकुवंशकथनम्, अत्रिवंशपरिचयः, ययातिचरितं, यदुवंशनिरूपणं, कार्तवीर्य-परशुरामयोश्चरितं, सगरचरितं, देवासुरसंग्रामः, कृष्णाविर्भावकारणं, विष्णुमाहात्म्यकीर्तनं, बलिवंशनिरूपणं, भविष्यराजचरितञ्चेति प्रसङ्गाः कीर्तिताः ।

तत उत्तरभागे उपसंहारपादे वैवस्वतमन्वन्तराख्यानं, भविष्यमनूनां चरितं, कल्प-प्रलययोः निर्देशः, कालमाननिरूपणं, चतुर्दशलोकानां मान-लक्षणनिर्देशः, नरकवर्णनं, प्राकृतिकलयविचारः, शैवपुरवर्णनं, सत्त्वादिगुणसम्बन्धात् जन्तूनां गतिः, अन्वयव्यतिरेकाभ्यां ब्रह्मस्वरूपप्रतिपादनञ्चेति विषयाः विवेचिताः ।

विश्वकोषकारेण लिखितमस्ति यत् रामायणी कथा ब्रह्माण्डपुराणात् उद्भूताऽस्ति, या एव अध्यात्मरामायणमिति नाम्ना प्रसिद्धाऽस्ति । परन्तु साम्प्रतं समुपलभ्यमाने ब्रह्माण्डपुराणे अध्यात्मरामायणं नास्ति । अस्मात् अनुमीयते यत् ब्रह्माण्डपुराणे परशुरामकथानन्तरं रामकथा स्यात् या एव अध्यात्मरामायणरूपेण पृथक् कृता वर्त्तते ।

**स्थानकालादिविवेचनम्** - ब्रह्माण्डपुराणे सह्यपर्वतोत्तरभागे प्रवाहितायाः गोदावरीनद्याः तीरप्रदेशाः पवित्रतमाः मनोहराश्चेति वर्णिताः सन्ति । परशुरामः स्वतपश्चरणार्थं समुद्रात् यां भूमिं याचितवान् सैव पश्चिमसमुद्र-सह्याद्रिमध्ये आसीत् । अतः परशुरामसम्बन्धात् सह्य-गोदावरीमध्यस्थप्रदेशा एव सुपवित्रत्वात् पुराणस्यास्य निर्माणस्थानं स्यादिति समीक्षकाणां मतम् ।

पुराणस्यास्य कालविषये डॉ. किर्फेलमहोदयस्य मतमस्ति यत् वायुपुराण-ब्रह्माण्डपुराणयोः अध्यायेषु स्थितसाम्यस्य विश्लेषणात् पुराणस्यास्य कालः चतुर्थशतकं स्वीकर्तुं शक्यते ।

ब्रह्माण्डपुराणे 'महाराजाधिराज' इति पदप्रयोगात् अनुमीयते यत् पुराणमिदं गुप्तकालानन्तरं षष्ठशताब्द्यामेव प्रणीतम् यतो हि 'महाराजाधिराज' इति पदस्य प्रयोगः गुप्तनरेशानाम् उत्तरकालीनानां मौखरीनरेशानां कृते कृतः आसीत् । किञ्च पुराणेऽस्मिन् कालिदासीयकाव्यानां वैदर्भीरीतेश्च महान् प्रभावः परिलक्ष्यते । अतः एभिः हेतुभिः निश्चीयते यत् पुराणस्यास्य निर्माणं षष्ठशताब्द्यां समभूत् इति ।

**बोधप्रश्नाः**

१. मत्स्यपुराणमते ब्रह्माण्डपुराणे कियन्तः श्लोकाः सन्ति ?

२. पुराणेऽस्मिन् कति भागाः वर्त्तन्ते ?

३. ब्रह्माण्डपुराणस्य कस्मिन् भागे भविष्यकल्पवृत्तान्तः वर्णितोऽस्ति ?

४. पुराणस्यास्य निर्माणं कुत्र स्यादित्यनुमीयते ?

५. 'महाराजाधिराज' पदप्रयोगः केषां नृपाणां कृते क्रियते स्म ?

**पञ्चमांशसारः** - अंशेऽस्मिन् त्रयाणां पुराणनां परिचयः प्रदत्तः । तत्रादौ मत्स्यपुराणस्य परिचयप्रसङ्गे तस्य चतुर्दशसहस्रश्लोकात्मकत्वं, वैवस्वतमनवे भगवता मत्स्यावतारेण प्रोक्तत्वं, सृष्टि-प्रलय-भूगोल-राजधर्म-गृहनिर्माण-प्रतिमानिर्माण-युद्धनीति-ब्राह्मणवैशिष्ट्य-पुरुषार्थ-पुत्रधर्म-श्राद्धविधि-नारीसमादरादिविषयप्रतिपादकत्वम्, आन्ध्रप्रदेशे नर्मदातटप्रदेशे वाऽविर्भूतत्वं, द्वितीय-चतुर्थशतकमध्ये रचितत्वं च समुपस्थापितम् । तथा च गरुडपुराणं विष्णुप्रोक्तम्, अष्टादशसहस्रश्लोकात्मकं, पूर्वोत्तरखण्डाभ्यां विभक्तं, सर्ग-विष्णवादिपूजाविधि-प्रासादलक्षण-सामुद्रिकरत्नादिशास्त्र-वर्णाश्रमधर्म-तीर्थमाहात्म्य-राजवंश-आयुर्वेद-छन्दःशास्त्र-सदाचार-रामायणादिसार-प्रेतकल्पादिविषयप्रतिपादकं, मिथिलाप्रदेशोद्भवं, नवमशतकाविर्भूतं चेति तत् स्वरूपादि प्रतिपादितम् । अन्ते चाऽन्तिमस्य ब्रह्माण्डपुराणस्य ब्रह्मप्रोक्तत्वं, द्वादशसहस्रश्लोत्मकत्वं, भागत्रये चतुष्पादेषु च विभक्तत्वं, कल्प-मन्वन्तर-मानससृष्टि-कालस्वरूप-प्रियव्रतकृतद्वीपसमुद्रविभाग-भारतादिवर्षवर्णन-लोकवर्णन-सप्तर्षिविवरण-राजवंश-भविष्यमनुचरित-नरकवर्णन-परब्रह्मस्वरूपप्रतिपादनादि-विषयविवेचकत्वं, गोदावरीतीरप्रदेशोद्-भूतत्वं, चतुर्थशतकाविर्भूतत्वं च प्रकाशितम् ।

**आदर्शप्रश्नाः**

**क) निबन्धात्मकप्रश्नाः** २०/१५

१. मत्स्यपुराणे के के विषया वर्णिताः, लिखत ।

२. गरुडपुराणस्य विविधविद्याप्रकाशकत्वं विचार्यताम् ।

**ख) विश्लेषणात्मकप्रश्नाः** १२/१०

१. ब्रह्माण्डपुराणस्य वर्ण्यविषयान् यथाग्रन्थं प्रकाशयत ।

२. मत्स्यपुराणस्य स्थानकालौ विवेचयत ।

३. गरुडपुराणे नीतिसारः कथं वर्त्तते सदृष्टान्तं प्रकाशयत ।

**ग) लघूत्तरीयाः प्रश्नाः** ५

१. मत्स्यपुराणस्वरूपं प्रकाश्यताम् ।

२. गरुडपुराणस्वरूपं स्थानकालौ च प्रकाशयत ।

३. ब्रह्माण्डपुराणस्य स्वरूपं स्थानकालौ च विवेचयत ।

४. गरुडपुराणीयप्रेतकल्पः समुपस्थाप्यताम्

**घ) एकाङ्कप्रश्नाः** १

१. मत्स्यपुराणे कति श्लोकाः अध्यायाश्च वर्त्तन्ते ?

२. मत्स्यपुराणे कति विधानां पितॄणां वंशवर्णनं वर्त्तते ?

३. कुमार्गगामिनां कुशासकानां वहिष्कारविषये केषाम् अधिकारः आसीत् ?

४. मत्स्यपुराणस्य रचनास्थानं किं स्यात् ?

५. गरुडपुराणं कस्य कल्पस्य प्रसङ्गे केन कस्मै प्रोक्तम् ?

६. गरुडपुराणस्य पूर्वखण्डे कियन्तः अध्यायाः वर्त्तन्ते ?

७. कस्मिन् शतके गरुडपुराणस्याविर्भावः अभूत् ?

८. ब्रह्माण्डपुराणस्य वक्ता कः ?

९. ब्रह्माण्डपुराणं कियत्सु पादेषु विभक्तम् ? तेषां नामानि च कानि ?

१०. कस्य मते ब्रह्माण्डपुराणस्य कालः चतुर्थशतकं स्यात् ?

**उत्तराणि** – १. चतुर्दशसहस्राणि श्लोकाः, २९०अध्यायाश्च, २. त्रिविधानाम्, ३. ब्राह्मणानां, ४. आन्ध्रप्रदेशः नर्मदातटप्रदेशो वा, ५. गरुडकल्पप्रसङ्गे, विष्णुना, गरुडाय, ६. २२९अध्यायाः, ७. नवमशतके, ८. ब्रह्मा, ९. चतुर्षुपादेषु, प्रक्रियापादः, अनुषङ्गपादः, उपोद्घातपादः, उपसंहारपादश्चेति, १०. डॉ.किर्फेलमहोदयस्य ।

❖❖❖